34

# प्रतिसंस्कृत निदानम्

## सोमः*

## Ephedra-Vulgaris

अयमुत्तरपश्चिमहिमालये सहस्रफीटतः (१०००) आदशसहस्र (१००००) मुन्नतप्रदेशमभिव्याप्योत्पद्यते।

लघुः सरलो गुच्छाकृतिः सम्मार्जनीवत्क्षुपः, ग्रन्थियुतशाखः। प्रशाखाश्च सरला हरितास्तरङ्गायितरेखासज्जितामसृणाः। मञ्जरी-पत्राणिच मध्यभागे एकीभूतानि अतिसरलानि दीर्घाणि क्वापि पत्राकृतीनि। शीर्षकाणि च $\frac{१}{४}$ तः $\frac{१}{३}$ इञ्च दीर्घाणि गुच्छाकारावर्त्त-सज्जितानि। फलानि क्षुद्रतराणि तनुवल्कयुतानि रक्तवर्णसरसम-ञ्जरीव। बीजानि एकत उभयतो वा, उन्नतोदराणि नतोदराणिवा।

शरदि तुषारपातात्प्रागापूर्णवीर्य्यत्वादस्य संग्रहः कार्यः। छायायां प्रशोष्यानार्द्रस्थाने रक्षेत्। आर्द्रस्थाने जलीयवाष्पसम्पर्के च गुणहीनतां भजते।

---

* पञ्चसहस्रवर्षतश्चीनदेशे "माहौङ्ग" नाम्ना श्वासरोगे प्रसिद्धः। लोकप्रचाराय सोमः, सर्पगन्धा चास्माभि संगृहीता वर्त्तते।

पत्रावृतानां लघूनां काण्डानामेव भवत्युपयोग:, तेष्वेव वीर्यस्य पूर्णतया विद्यमानत्वात्। अत्र† उपसोमानुसोमनामकमुपक्षार-द्वयं वर्तते। तत्र प्रायस्त्रिभागमात्र: प्रथम:। एकभागश्च द्वितीय:। द्वयोर्मात्रा च प्रतिशतं ८' त: १'२ दृश्यते।

जीवशरीरे क्रिया—प्रथमो हृदयस्य प्राणदासमव्ययीनाड्यो स्वायत्तीकृत्य रक्तवेगं वर्धयति। तथा श्वासमार्गस्य शाखा: प्रशाखा: प्रसारयति, श्वासकेन्द्रे च न काचिदस्य क्रिया। चक्षुषि प्रतिशतं भागचतुष्टयमितोऽस्य द्रव: प्रक्षिप्त: पञ्चविंशतिर्भिर्मिनटैस्तारकां प्रसार्य शिरसि रक्तवेगवृद्धया निद्राऽभावाय कल्पते द्वितीयस्यापि क्रिया प्रथमवत्। रक्तवेगवृद्धिश्च प्रथमापेक्षयाऽल्पा। अयं चापेक्षया मूत्रकरत्वाद्विशेषतया व्यवह्रियते।

सर्वस्य क्षुपस्य (मिलितयोरुपक्षारयोर्वा) क्वाथोऽवलेहो-ऽरिष्टो वा यावच्छ्वासनाड्या: शाखा-प्रशाखा: प्रसारयति नतावद्रक्त वेगं ‡ वर्धयति। विभिन्नोपक्षारापेक्षया मिलितयोरधिकोपकार-कारिता, दीर्घकालसेवनेऽपि नापकार:। मात्रा च चूर्णस्य पञ्च, सप्त वा रक्तय:प्रात: सायमुष्णजलेन।

१ सोम-चूर्ण श्वासे श्वासयन्त्रगतान्यरोगे वा त्वरितं बिशिष्टं स्थायिफलदम्। यदा च श्वासवेगेन प्राणान्तकर: क्लेश: तदा चूर्णं झटिति फलति धत्तूरपत्रधूपवत्। नियतप्रयोगेचास्य प्रतिनिवर्तते रोग:।

---

† Ephedrine-pseubo-ephedrine
‡ High blood pressure.

२ अस्यारिष्टः—श्वासनाड्या आक्षेपे वक्षसि साँय, साँय शब्दे श्लेष्मरोगेषु चाक्षेपहर-कफाकर्षकत्त्वाद्विशिष्टमुपकरोति ।

३ अवलेहश्चः—शिशूनां श्वासनाडीशाखाप्रशाखाक्षेपे वातकासे (कुकरखांसी) अन्यासु च श्वासयन्त्रपीडासु विशिष्टं फलति । येषां च स्वभावादेव सहसैव कासप्रतिश्यायौ भवतो वक्षसि च शब्दायते श्लेष्मा तेषामयं सुखसेव्यो नियमेन व्यवहृतो विशेषोपकाराय ।

४ हृदयोत्तेजनार्थमपि व्यवह्रियते ।

५ श्वसनककण्ठरोहिण्यादिषु च हृदयोत्तेजनार्थमरिष्टोऽस्य त्रिश्चतुर्वा देयः प्रत्यहम् ।

---

# आन्त्रिको ज्वरः

## Entericfever or Typhoid.

ज्वरो दाहो भ्रमोमोहो, ह्यतीसारो वमिस्तृषा ।
अनिद्रा च मुखं रक्तं, तालुजिह्वा च शुष्यति ॥१॥
ग्रीवायां परिदृश्यन्ते, स्फोटकाः§ सर्षपोपमाः ।
एभिस्तु लक्षणैर्विद्या न्मन्थराख्यं ज्वरं नृणाम् ॥२॥

( योगरत्नाकरः )

विषमज्वरो यथा एकविधसूक्ष्मभूत* ( जन्तु )जस्तथैवाऽन्त्रिकज्वरोऽपि भूतविशेषज‡ एव । लभ्यते चायमान्त्रिकज्वरिणो-

---

§ अल्पार्थेकन् । यत्रहि पिडकोद्गमः, सच प्रायः प्रथमसप्ताहान्ते, ग्रीवात आरभ्य क्रमेणऽधोऽधोव्रजन् द्वितीयसप्ताहशेषे जङ्घामूलं व्रजति, प्रथमोत्पन्नाश्च प्रायशो विलीयन्ते पिडकाः । तेषां स्थितिप्रदेशदर्शनेन रोगस्यायुरप्यनुमीयते । आपामरप्रसिद्धेयं परीक्षा, अन्यज्वरविलक्षणाश्च भवन्ति पिडकाः । अन्येतु सर्वेष्वेव दीर्घकालव्यापिज्वरेषु यत्र मलिना त्वक् स्वेदश्च भवति, तत्र मुक्तासदृशाः क्रमशोऽधःप्रसरणशीलाः पिडकाः प्रकाशन्त एव प्रत्यहमङ्गप्रोक्षणेन शरीरपरिमार्जनाच्च नभवन्तीत्याहुः ।

* केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ।

‡ Bacilli of Eberth.

मले† । तथा चायं दुग्धेन +, पानीयजलादिना वा सह मिलित्वा क्षुद्रान्त्रस्यान्तिमभागं क्वापि वृहदन्त्रादिमभागं वा समाश्रित्य तत्र व्रणयित्वा सन्निपातमान्त्रिकाख्यं × करोति । व्रणाच्चास्मात्पुरीषेण सह रक्तमेति ( रक्तातिसारः ) कदाचिदयमन्त्रेछिद्रं करोति ततश्च छिद्रान्त्रोदरं§ जायते । अन्त्राद्रक्तं गतो ज्वराद्युपद्रवान् करोति, यकृत्प्लीहानौ चात्र वर्धेते ।

## प्रथम सप्ताहे

## लक्षणानि

प्रथमं कटिशूलक्षुन्मान्द्यप्रभृति लक्षणानि दिनद्वयं दिवसत्रयं वा एवमेव तिष्ठन्ति । चतुर्थेह्नि ईषच्छीतेनसह ज्वरभावः । प्रथमसप्ताहे, एकोत्तरशततापमानत आरभ्य प्रत्यहमेकशो द्विशोवा अंशं सोपानक्रमेण वर्धते । प्रथमसप्ताहशेषे च त्र्युत्तरं

---

† मलस्याणुवीक्षणपरीक्षया ।

+ यथा—कुत्रचित्सर्वजनजलाशये मललिप्तमान्त्रिकज्वरिणो वस्त्रादिकं प्रक्षाल्यते तन्मलसम्पर्कदूषितं कथमप्युदरगतं दुग्धादिवा ज्वरमान्त्रिकाख्यं जनयति ।

× प्राञ्चस्तु—कृमिजत्वेऽपिदोषदूषितत्वमप्याहुः । पूर्वतो विषमज्वरार्त्तस्य प्लीहाभिवृद्धिर्नान्त्रिकज्वरं निश्चयेन सूचयेत् सि० नि०

§ Peritonitis.

चतुरुत्तरं वा शतमितोऽधिकं वा भवति। नाडी गणना च प्रति मिनटं शततोविंशत्युत्तरशतं यावद्भवति। जिह्वाया मध्यं मलिन-मुभयपार्श्वे अग्रभागश्च परिष्कृतो रक्तवर्णश्च भवति। प्रधानलक्षण-मान्त्रक्षतसन्निपातस्यैतत्। ईदृशीं जिह्वांविहायान्त्रक्षतमन्यत्र कस्मिन्न-पिज्वरे प्रायो न दृश्यते। रात्रौ किमपि प्रलपति। अस्यां चावस्थायां विट्सङ्गः प्रायो भवति। समये चास्मिन् ईषद्रक्ता मसूराकृतयः पिडकाः* उरसि उदरे च कदाचिद्दृश्यन्ते, विशेषतो गौरव-र्णेषु स्फुटाः।

## द्वितीय सप्ताहे

प्रबलज्वरः—१०३°—१०४° प्रातः किमपि ह्रसति १०२°—; प्रलापः स्मृतिह्रासश्च, जिह्वा शुष्यति, पिपासा वर्धते, आध्मानं क्वचिदतिसारश्च, ओष्ठस्फुटनम्, उरसि पृष्ठे च मुक्ताइव लक्ष्यः पिडकाः† (सर्षपिका) पित्तोल्वणे च—"गात्रे च बिन्दवो रक्ता" इत्युक्ता रक्ता बिन्दवो दृश्यन्ते। दक्षिणवंक्षणोन्तरिकप्रदेशः पीड्य-मानो दूयते कों कों इति शब्दायते च। समयेचास्मिन् प्रबलोति-सारोऽहोरात्रंत्रिंशत्पञ्चविंशतिवाकृत्वो भवति। उदरे गुड़गुड़ाशब्दः श्रूयते। प्रतिघन्टं पञ्चकृत्वः सप्तकृत्वो वा मलमतिसरति। तच्च चणकयूषवत् सफेनं सरक्तं च पीताभं भवतीति निर्णायकं

---

* Eruptions.

† Eruptions.

लिंगम् । रक्तमात्रा च क्वचिदल्पो क्वचिन्महतो। आन्त्रक्षतज्वरमलमतिविपाक्तं भवति। प्रचुरातिसारसत्वेऽपि रोगस्वभावादाध्मायते, उदरम्। काले चास्मिन्नाड़ी निभृत-निपुणतया लक्षणीया भृशंदुर्बला क्षीणा च भवति, गणनायां प्रतिमिनटं विंशत्युत्तरं त्रिंशदुत्तरं वा शतं भवति। ज्वरश्चास्मिन् द्वितीयसप्ताहे प्रत्यहं द्विर्भवति। प्रातःकोऽपिविरामः। पुनश्चैकादश द्वादशवादनवेलायां वर्धते; अतीते सन्ध्याकाले ह्रसति, पुनारात्रौ वृद्धिमेति। न काप्येतस्यस्थिरता; एकदातापमाने ज्वरो द्व्युत्तरंशतं १०२ घण्टां परतश्चतुरुत्तरशतं १०४ पुनरर्धघण्टांपरतएकोत्तरं शतं १०१ दृश्यते (एवं क्रमेण ज्वरस्यारोहावरोहेसति रोगिणः स्वजना पितरौच मुदिता भवन्ति। किन्तु प्रागभिहिते ह्रासवृद्धी स्वभाव एवास्य) ज्वरप्राबल्ये (१०३—१०४) पिपासा वर्धते, फुस्फुसे श्वासप्रणाल्याञ्च दोषवृद्धयारक्तवृद्धिर्भवति, अतः कासः श्वासनाड़ी प्रदाहश्च जायते, कासप्राबल्येऽन्तरुरसि सौं, सौं, ध्वनि (महाश्वासः) भवति। सर्व एवैत उपद्रवा अतिसारश्च प्रायोयुगपद्देवदृश्यन्ते। काले चास्मिन्नाड़ीं विशेषतो लक्षणीया।

## तृतीय सप्ताहे

येषां पूर्वोक्ताः सर्वे, उपद्रवा न प्रकाशन्ते, तेषां द्वितीय सप्ताहाव साने ह्रसति ज्वरः। प्रातः शतं १००, सायमेकोत्तरं शतमेवमवरोह क्रमेण ह्रसन् ज्वर एकविंशेदिवसे सर्वथा प्रतिनिवर्त्तते।

अतिदुर्बलः क्षीणश्च भवति रोगी। येषाञ्चैते, उपसर्गाद्धितीयसप्ताहे प्रादुर्भवन्ति, तेषां तृतीयसप्ताहे सर्वे ते (अतिसार, कास, रक्तातिसार, ज्वरादयः) क्रमेण ह्रसन्ति। क्रमेणैव च स्वस्थोभवति रोगी। क्वचिच्चपूर्वोक्ता उपसर्गाः क्रमशः प्रवर्धन्ते। प्रबलोऽतिसारः प्रचुरश्चरक्तागमः, एवमन्त्रव्रणच्छिद्रान्त्रोदरायकल्पते। प्रलपति, अविरामातिसारसत्वेऽप्याध्ममत्युदरम्। शुष्यतिजिह्वा, सूत्रवत्क्षीणा दुर्बला च नाड़ी स्थित्वा स्थित्वा चलति। ज्वरश्च चतुरुत्तरं पञ्चोत्तरं वा शतं १०४° १०५° भवति। अतिरक्तनिर्गमादन्त्रच्छेदाच्छिद्रान्त्रोदरतः शीताङ्गतया मृतिर्भवति।

## चतुर्थसप्ताहे

प्रायशश्चतुर्थसप्ताहे ज्वरोऽतिसारश्च निवर्त्तते, जिह्वास्वच्छा, क्षुत्प्रवृत्तिः, क्रमशोरोगनिवृत्तिः, यद्यस्यांन सावधानतया वर्त्तते रोगी तथा सति पुनराक्रमणसम्भावना।

## इदमत्रावधेयम्।

आन्त्रिकः प्रायः पुनरावर्त्तते। अस्यैव "पुनरावर्त्तक"इतिनाम, प्रायोऽष्टसप्ताहं दश सप्ताहं वा यावन्मन्थरस्योपभोगो दृष्टः।

## आन्त्रिक ज्वरस्य चिकित्सा

तत्र प्रतिषेधिका चिकित्सा—गृहे प्रतिवेशे वा रोगप्रादुर्भावे गृहजनाः प्रतिवेशिनो वा कथं व्यवहरेयुर्यथा तेषां रोगसंक्रमभीर्न

स्यात्। आन्त्रिको दूषितदुग्धजलादि*पानादुद्भवतीति प्रागवोचाम। अत एतत्प्रसरावसरे—दुग्धं पेयं जलादिकं वा शृतशीतं व्यवहरेत्। अपरं भोज्यद्रव्यमान्त्रिकस्य रोगिणो गृहे न रक्षणीयम्। दुग्धं पानीयजलादिकमन्यद्भोज्यादिकं वा सुरक्षितं स्वाच्छादितं विधेयम्। रीत्यानयाऽऽन्त्रिकाद्भवति रक्षा।

## अत्रश्लोकाः

गृहं तस्य चतुष्पार्श्वं सर्वतः परिमार्ज्यताम्।
एकत्रगणशो वासो ध्यानेन परिहार्य्यताम्॥१॥
मलमूत्रप्रणाल्यश्च प्रत्यहं बहुवारिणा।
मार्जनीया विशेषेण मौक्तिक ज्वर सम्भवे॥२॥
मत्रस्य च पुरीषस्य स्थाने कार्य्यो विधानतः।
सुधा चूर्णस्य प्रक्षेपः प्रत्यहं चावधानतः॥३॥

येच मन्थरज्वरिणः सेवा परास्तान् विहाय न कोप्यन्योरोगिगृहे प्रवेशं कुर्यात्। शुश्रूषाकारिणोऽपि शुश्रूषां कृत्वा रोगि गृहाद्बहिरागत्य हस्तौ पादौ च प्रक्षालयेयुः। तेषां वस्त्रादौ रोगिणो मलं संपृक्तंचेत्तत्क्षणात्तद्वस्त्रमपहाय प्रक्षाल्य च पुनरुष्णजले श्रपयित्वा व्यवहरेत्। यस्मिन् पात्रे रोगी मलविसर्जनं करोति मलत्यागात्

*अत एव प्राञ्चस्तु रोगिगृहोदक स्पर्शमपि–प्रकरणान्तरेण-निषिषिधुः "नैषामन्नानि भुञ्जीत नचोदकमपि स्पृशेत्" ( च० इ० अ० ११ श्लो० २४ )

परं तत्पात्रे उष्णं जलं † प्रदेयम् । यद्वा सुधाचूर्णक जले समालोड्य तेन जलेन तन्मलपात्रमापूरणीयम्, एवं कृते आन्त्रिकबीजं‡ नश्यति । इत्थमुष्णजलस्य सुधाचूर्णकजलस्य वा मलेप्रक्षेपणं "मलशोधनं"❋ नाम । न कदाचिदप्यान्त्रिकस्य मलं मृत्तिकामधः पूरणीयम् यत आन्त्रिकबीजं नवफीटमितेगर्तेऽप्यधो मृत्तिकान्तर्निक्षिप्तं जीवति वर्धते च । रोगिणो वस्त्रं मलेन दूषितं गृहाद्बहिर्नीत्वा प्रथमं 'कार्बोलिकद्रवे' अर्धघण्टाकालमार्द्रीकृत्य तत उष्ण जले श्रपयित्वा क्षालयित्वा च व्यवहरेत । भोजनपात्रादिकं प्रतिभोजनात्परमुष्णजलेन प्रक्षालनीयम् । मलत्यागात्पर मीषदुष्ण जलेन गुदप्रक्षालनं कार्यम् । अथवोष्णजले लोतमार्द्रीकृत्य तेन परिमार्जनीयम् ।

रोगावस्थायां यद्गृहे रोगिणा उषितं तत्प्रतिरुद्धगवाक्षनाडीकं विधाय तत्राऽहोरात्रं गन्धकधूमो देयः । तदनु सुधालिप्तं गोमय मृत्तिकालिप्तं वा यथायथं कार्यम् । प्रत्यहं प्रातोऽर्धप्रस्थमितोदुम्बरपत्रक्वाथे अर्द्धतोलकं शुद्धं सौभाग्यमवाप्य तेन मुख दन्तादि प्रक्षालनं विधेयम् । असमर्थश्चेद्रोगी तदा सेवकउक्त जले कार्पासपिचुमाप्लाव्य जिह्वादन्तमुखादिप्रक्षालनं तस्य कुर्यात् । एतेन मुखव्रणोऽपि नश्यति, नवनीतयुतेन सौभाग्येन वा व्रणे लेपः कार्यः ।

---

† Boiling water. ‡ Bacilli.

❋ Disinfection of the stool.

## आन्त्रिकस्य साधारणीचिकित्सा

चिकित्सा क्रमतः पूर्वमान्त्रिकज्वरिणो बुधैः।
पथ्यक्रमे च सेवायां करणीयो विचारणा॥

निवातातपप्रवातातपैकदेशे च रोगिनिवासो विधेयः। प्राय-आन्त्रिके भवत्युदरविकारोऽतः पथ्यं तथा विधेयं यत्त्वरितं पाकमियात्। यद्यच्च कालेन जीर्यति तत्सर्वं परिवर्जयेत्। ज्वरस्य प्रथमावस्थायां जलवत्तरलं लघु पाकद्रव्यं प्रदेयम्।

यत्र दुग्धं न जीर्यति विकृतंदधीव कठिनी भूतं मलं बहिरायाति, आध्मापयत्यतिसारयति च तत्र केवल यवजं वारि प्रदेयं भिषजा तदा। अत्र प्रथमावस्थायां प्रतिषिध्यतेपयः तदावश्यकत्वे अर्धजल त्रिपादजलं वा उष्णीकृतं लवणभास्करादि पाचनानुपानैः प्रदेयम। एवं कृतेऽपि कदाचिद्विकृतं दधीव मलीभूतं बहिरायाति चेत् तदा सर्वथा न देयम्।

आन्त्रिक ज्वरिणां प्रचुरं द्रवद्रव्यं यवमण्डादि प्र हिमं शीतलं जलं च ज्वरतापशुष्कजलांशपूरणाय प्रचुरमूत्र-प्रवर्तनद्वारा रोगविषप्रक्षालनाय च। न चात्र कथञ्चिदपि विहायोपकारमपकारभयं शंकनीयमित्थमहोरात्रं सपादप्रस्थद्वयं द्रव-द्रव्यं प्रदेयम्। यत्र दुग्धं न पचति तत्र 'मोरटः'† प्रदेयः। तद्विधिः—रोगिणः पानयोग्यप्रमाणे दुग्धेऽग्नौ, उत्फणिते निम्बूक रसस्य कतिचन विन्दून् प्रक्षिपेत् प्रक्षेपमात्रे च तद्दुग्धं-

† Whey.

विक्रिया ( दधिभावं ) मेति ततः शुद्ध वस्त्रेण गालयित्वा तज्जलं पाययेत् किलाटं चापसारयेत् । प्रतिपाने च तत्कालविधानमस्य ।

मुख शोष तृषा दाह, रक्त पित्त ज्वर प्रणुत् ।
लघुर्बलकरो रुच्यो "मोरटः"* स्यात्सितायुतः ।।

भावप्रकाशः ।

सितास्थानेऽत्र संप्रति "ग्लूकोजं" सिताभेदं प्रशंसन्ति कुशलाः ।

काले काले चापि केवलो पि 'ग्लूकोजो' द्विमापमात्रया बलाधानाय दीयते त्वरितमोजस्करत्वात्, अयं हि पञ्चदशभिर्मिनटैरक्तभावमेति नारङ्ग रसवत् ।

आन्त्रिकेभ्योऽधिकौषधदानं न शोभनम् । यावच्छक्यं प्राकृतिकचिकित्सैव विधेया ।

भवतश्चात्रः—

एकान्ता रोगि शुश्रूषा, कर्तव्या विश्रमंविना ।
परिवर्तनशीलेषु तथैवागन्तुलक्षमसु ।। १ ।।
निपुणाभिषजो दृष्टिः प्रतीकारेऽविलम्बनम् ।
चिकित्सायाः प्रधानन्तु जगुरङ्गविदाम्वराः ।। २ ।।

अस्य चिकित्सायां प्रथमतएवनाड़ी सावधानतया लक्षणीया इति प्रागुक्तम् । आन्त्रिक ज्वरकारण मान्त्रिककृमिः‡ पाश्चात्यमते,

---

* नष्टदुग्धं भवेन्नीरं मोरटं जेज्जटोऽब्रवीत् ।

‡ Typhoid Bacilli.

प्राच्य मतेतु कृमिजत्वेऽपि उत्तर कालं दोषैरनुबध्यते, आगन्तुक रोगवत् ।

अस्य बीजमुदरमनुप्रविश्य निसर्गतः क्षुद्रान्त्रमधिवसति ततश्च रक्तमनुप्रविश्य तांस्तानुपद्रवाञ्जनयति । अतो येन केनाप्युपायेन तस्य बीजस्य यथा नाशः स्यात्तथाविधमौषधं व्यवहरणीयम् । उपद्रवाश्च—

तीव्रज्वरो१ऽतिसारश्च२ रक्तातीसार३ एव च ।
व्रणः४ प्रलापः५ श्वसने७ छिद्रान्त्रमुदरं८ तथा ॥१॥
८आध्मानमिति†चैतेऽष्टावान्त्रिकोपद्रवा मताः ।

अथेदानीमुपद्रवाणामेकैकस्य चिकित्सा । तत्र तीव्रज्वरस्य-प्रागवोचाम यन्मंथरज्वरस्य प्रथमावस्थायां ज्वरः १०१° एकोत्तर शततः १०२° द्व्युत्तरशतपर्यन्तं प्रथमं वर्धते ह्रसति च, ततः त्र्युत्तर-चतुरुत्तरशत १०३°-१०४° पर्यन्तं प्रथमसप्ताहे वर्धते । यद्यस्मिन्नुदरगौरवं तत्ररसपुष्पं २½ रक्तिकं स्वर्जिक्षारः १० र० ( एकामात्रा ) जलेन देया अनया पञ्चभ्यः सप्तभ्यो घण्टाभ्यःपरं द्विस्त्रिर्वा मलशुद्धिर्भवति । अन्त्रस्थमान्त्रिक बीजं च नश्यति ।

आन्त्रिकस्य प्रधानलक्षणेऽतिसारे सति आन्त्रिकबीजनाशकमपि रसपुष्पं न देयम्, पुनरतिसरणात्ततो रक्तस्रावान्मृत्युभीतेः ।

---

† चादन्येऽपि वक्ष्यमाणा ज्ञेया ।

प्रथमसप्ताहस्य प्रथमदिनचतुष्टय एव विट्सङ्गे रसपुष्पं प्रयुज्यते तदनु द्वितीये वा सप्ताहे । यत्र च द्वितीये सप्ताहे विट्सङ्गः ( एवं हि दृश्यते, यत् पञ्चष दिनानि न भवति मलप्रवृत्तिः ) तत्र द्वितीय दिवसे धाराय-त्रेण ( कांच की पिचकारी ) पिप्पल्यादितैलेन ( अर्शोऽधिकरोक्तम् ) तिलतैलेन ( ग्लीसरीनेन ) वा

तोलकद्वयेन तदेकेन वा मात्रावस्तिः प्रदेया । फलवर्त्तिर्वा, ( ग्लीसरीनकी बत्ती ) एतेन नातिचिरान्मलग्रन्थयो बहिरायान्ति । न चात्र कदाचिदपि प्रथमसप्ताहात्परं मलप्रवृत्तये विरेचनं प्रदेयं किन्तु दिनद्वयं मर्यादीकृत्य पूर्वोक्तो मात्रावस्तियोगः फलवर्तिर्वा प्रदेया । प्रागुक्तं पुनःपुनरप्यभिधीयते, ज्वरकारणमान्त्रिकाणुः, येनकेनाप्युपायेनत न्नाशाज्ज्वरह्रास इत्यन्वयव्यतिरेकेणावधारणीयम् । आन्त्रिकाणुशक्तिह्रासायाल्पमात्रया ( ½रक्तिः ) "ताम्रभस्म" प्रयोगःपञ्चकृत्वःषट्कृत्वो वा अहोरात्रेण कार्यः । एवं कज्जली पर्पट्योः, ताम्राभ्रकस्य, केवलाभ्रकभस्मनो, ( अयमस्मत्कुलपरम्परानुभवः ) मकरध्वजस्ययोगो लवङ्गजलानुपानेन तिस्रश्चतस्रो घण्टा वा मर्य्यादीकृत्य कार्यः । ताम्रपात्र उष्णीकृत तत्रैवावस्थितं जलं पानार्थे, अन्यद्वा सिद्धविहित मेवंविद्यम् । एतेन ज्वरो, मले गन्धश्च ह्रासमेति जिह्वापरिष्कृता भवति अन्ये चोपसर्गा न समागच्छन्ति ।

प्रारम्भत आज्वरावसानं केवलाभ्रकभस्मप्रयोगादपि न भवन्त्युपसर्गाः । ताम्रभस्म केवलमान्त्रिककृमीनेव न हन्ति, किन्तु सर्ववि-

धकृमिरिपुर्ह्द्यो हृत्सादा†निवर्तकश्च । आभानिर्यासदारु सितानुपानेन चतुर्मुखरसप्रयोगोऽपि प्रशस्यते । यवानीसत्वमर्धरक्तिकामात्रया मधुना ज्वरवेगह्रासाय कल्पते ।

यदाच्छरीरोत्तापःचतुरुत्तरं पञ्चोत्तरं ( १०४°—१०५° ) वा शतं भवेत्तदा स्वेदनीयो॰ रोगी ।

स्वेदनविधिश्च—एकस्मिन्पात्रे स्वच्छमुष्णजलं कृत्वातत्र नवीन वस्त्रमाप्लाव्य निपीड्य च तेन समस्तगात्रं प्रोञ्छनीयम्, तदनु शुष्कवस्त्रेण प्रोञ्छ्य, उष्णवस्त्रेण रोगिशरीरमाच्छादनीयम् । ततो यदा स्वेदोद्गमः स्यात्, शुष्कवस्त्रेणापनेतव्यः सः । एवं कृते सति अंशद्वयं तत्त्रयं वा ज्वरस्य ह्रासो भवति । यत्र रोगिणः कासःस्यात्तत्र उरःपृष्ठदेशं च विहाय स्वेदःकार्यः ।

## ज्वरह्रासाय हिमप्रयोगः*

तदभावे शीतलजलस्य । त्र्युत्तरशतां (१०३°) शं गते ज्वरे शिरसि हिमपोट्टलीप्रयोगो विधेयः, तदित्थम्—रोगिशिरोवालान् वालच्छेदनयन्त्रेण ( बाल काटने की मशीन से ) लघूकृत्य रबर निर्मितपोट्टलीद्वयं च गृहीत्वा तत्र हिमशकलान्यापूर्य तयोरेका शिरसि, अन्या गलपृष्ठभागे धार्या । गलिते च हिमे पुनर्नूतनहिम शकलानि जलमपसार्य देयानि । यदि च रोगी हस्तेन हिमपोट्टली

---

† Heart fail. ॰ Sponging

* Use of ice bag.

मपसारयति तदा सा न धार्या। यत्र च ग्रामादौ हिमं न प्राप्यते तत्र रोगिशिरोमुण्डनं विधाय शुद्धवस्त्रं शीतल१जलेनाप्लाव्य निपीड्य च तेन सम्पूर्णं शिरोऽनवरतमावेष्टनीयं वस्त्रं च पुनः पुनरार्द्रीकरणीयम्। कस्यचिज्ज्वरः कतिचिद्दिनानि समतयैव तिष्ठति न वर्धते न क्षीयते। अन्यस्य च ज्वरलक्षणानि अतिमृदुतया प्रकाशन्ते, रोगी प्रत्यहं सर्वाणि स्वकार्य्याणि निर्वर्तयति, भोजनपानादौ च नविशेषो भवति। सतिच कदाचित्कठिनान्नादौ सेवने छिद्रान्त्रोदरेण म्रियते।

अतिसारे—यद्यान्त्रिकस्य प्रथमावस्थायामेव रसपुष्पप्रयोगेण मलशुद्धिः कृता, यद्वा आन्त्रिककृमिनाशकं रसोनरसानुपानेन ताम्रभस्मादिकं व्यवहृतं पथ्यसेवनं यथोक्तमनुष्ठितं तथासति नातिसारभयं भवति। यत्र जलीय पथ्य-मोरट यवमण्डा द्यान्त्रिककृमिनाशकौषधादिषु व्यवहृतेष्वपि भवत्यति सारः, मलपरीक्षया च तत्र विकृतदुग्धांशाः, अजीर्णं द्रव्यं वा न दृश्यते तत्रानुमेयमान्त्रिकाणुरुदरे कृतवान् क्षतमिति।

अत्र चिकित्सा—द्विरक्तिमात्रया रसपर्पटी प्रयोगः घन्टात्रयं मर्यादीकृत्यरसोनरसेन कार्यः। एवमाभानिर्यासदारुसिताजलेन, लवङ्गजलेन वा कर्पूरादिवटी, सिद्धप्राणेश्वरो वा देयस्त्रिसृभिः

---

१ त्रिभागशीतलजले भागैकं "यूडिकलोनं" मावाप्य तेनार्द्रीकृतवस्त्रपट्टिका शिरसि पुनः पुनः प्रदेया।

चतसृभि र्वा मात्राभिर्लाभ:स्यात् यद्येवमपि पुनर्भवेदतिसारः, इष्यते च त्वरितं लाभः तदा पूर्वोल्लिखितौषधान्यतमं मुखतो दत्वा निम्न-लिखितैर्मात्रावस्तिः प्रदेया। कर्पूररसः २॥ र० पलमित ईषदुष्णोदुम्बरपत्रक्वाथः, शर्करा तोलकमिता सर्वमेकीकृत्य प्रतिमलत्यागात्परं मात्रावस्तिःप्रदेया। यत्र च मले विकृतदुग्धांशा अतिदुर्गन्धयुतमजीर्णवस्तु वा दृश्यते तत्रातिसार प्रतिरोधनोपायो न करणीयः। यतःकृते प्रतिरोधे द्विगुणिताध्मानभीतेः, ज्वरवृद्धिभीतेश्च। तथा विधं मलं यावदेव बहिरायाति तावदेव रोगिणो मङ्गलमिति। इत्थं हि दृश्यते, यदहोरात्रं त्रिंशच्चत्वारिंशद्वा वारानतिसरति। समये चास्मिन् नाड़ीपरीक्षणे हृत्परीक्षणे च सावधानता, चेद्दुर्बलता तयोस्तदा मात्रया मृतसञ्जीविनी सुरा, द्राक्षारिष्ट, मृगमदासव मकरध्वज, वसन्तकुसुमाकर, वसन्ततिलक, लक्ष्मी-विलासादयोरसा घण्टात्रयं तच्चतुष्टयं वा मर्य्यादीकृत्य एकशो द्विशो वा देयाः। रसपुष्पं रक्तिकाद्वादशांशं शर्करा रक्तिमिता १ र० इत्येकामात्रा प्रातःसायं पूर्वकल्पेन देया, पर्पटी च।

मलेनसहरक्तस्रावः—( अधोगतरक्तपित्तम् ) आन्त्रिके रक्तस्रावोमहानुपसर्गः, अनेन नाड़ीक्षीणा शीता Collapse च भवति। हृत्सादस्य Heart fail च सम्भावना। अत्र नातिचिरात्प्रतिकारो विधेयः। पञ्चरक्तिमात्रया घण्टात्रयंमर्य्यादीकृत्य चतुः कृत्वः पञ्चकृत्वो वा "उदुम्बरपत्रसार" ( उदुम्बरपत्राणां घनीकृतः क्वाथः ) स्य प्रयोगेण, शोणितार्गलरसप्रयोगेण वा

भवति लाभः। सरलतैलं (तारपीन का तेल) पञ्च षड् विन्दु-मात्रया, आभानिर्य्यासतोयेन पूर्वकल्पेन देयम्। अहिफेनासवोऽपि दशानां, पञ्चदशानां, वा विन्दूनां मात्रया ईषद्गोलद्रवेण चमत्करोति। षड्क्ति मात्रया गोदन्तिभस्म प्रयोगो वा, किञ्च— विशेषतो विट्पथ संप्रवृत्तो, पयोहितं मोचरसेन सिद्धम्। वटावरोहैर्वटशुङ्कैर्वा, ह्रीवेर नीलोत्पलनागरैर्वा ॥ १ ॥

गद–निग्रह रक्तपित्त०

अयं योगोऽत्र वृद्धानुमतः।

ईषदुष्णोदुम्बरपत्रक्वाथे, ईषद्गोलनिर्य्यासमीषदहिफेनं च प्रक्षिप्यैतेन वस्तिं दद्यात्, प्रतिमलत्यागात्परमियं विधेया भवति, अनया नातिचिरात्प्रतिनिवर्तते रक्तम्।

**निवृत्तेऽपि रक्ते पुनारक्तागमनभीतेरन्तरान्तरा वस्तिः प्रदेयैव अत्राऽऽपञ्चदशदिनमपि मलाप्रवृत्तौ न काचित्क्षतिः।**

पञ्चदश दिनात्परं पलपरिमितेन जैतून तैलेन, पिप्पल्यादितैलेन, ग्लीसरीनेन वा, मात्रा वस्तिः प्रदेया। यत्रैतेनापि न मलप्रवृत्तिः तत्र शोधन द्रव्य (साबुन) जलेन वस्तिःप्रदेया—तथाहि—अर्ध-प्रस्थमिते, कदुष्णजले शोधनद्रव्यं मात्रया घोलयित्वा समस्तेन तेन निरूहवस्ति कार्याः। रक्तस्रावकाले च केवलं जलवत्तरलं शीतीकृतं पथ्यं देयम्। पिपासा निवारणाय सति सम्भवे हिमजलं शीताम्बु वा देयम्। ऊर्णावस्त्रेण (फ्लैनल) चोदरं परितो वेष्टनीयम्।

यावदन्त्रे प्रदाहो व्रणाश्च तावद्भवति छिद्रान्त्रोदरस्य सम्भावना,

अतो मलमूत्रत्याग कृतेऽपि-उत्थानादि निषिध्यते,
तत्र शयितस्यैव मलमूत्रत्यागक्रिया विधीयते।
पार्श्वपरिवर्त्तनादिकमपि विमृश्यैव कारयेत् १।

पृष्ठ व्रणः—

बहुतिथकालं शय्यायामेव रोग भोगाच्छक्तिह्रासस्ततः पृष्ठ-व्रणः सम्भवति। तत्र समभागशर्करायशदभस्मनोद्धूलनम्। प्रथमत एव सुरया पृष्ठभागस्य प्रत्यहं प्रोञ्छनान्न भवति पृष्ठव्रणः। जाते च व्रणे व्रणचिकित्सा विधेया।

प्रलापः—

प्रलाप, निद्राभावाऽरति-शयनवस्त्रकेशादि, लुञ्चन सहसो-त्थान, पतन, कम्प, विसंज्ञतादीनां कारणं प्रबलज्वरं मन्यन्ते कुशलाः। शिरसि हिमपोट्टलीदानं Ice bag एतदभावे मुण्डनं कृत्वा शीतलजलाप्लुतवस्त्रेण पुनः पुनः शिरोवेष्टनम्। किञ्च—नरसारसोरकयोः पलपञ्चकं सर्ध प्रस्थमिते जले प्रक्षिप्य 'शीतलद्रवो' भवति, एतज्जलाप्लुतवस्त्रेणाऽनवरतं शिरोवेष्टनं प्रलापहरं ज्वर काले शिरोरुजा हरं च। कदाचिच्चातिप्राबल्ये प्रलापस्य न भवति लेशतोऽपि निद्रा, तत्र सर्पगन्धामूलचूर्णं दशरक्तिकं जलेन दद्याद्द्विस्त्रिर्वा रात्रौ,निद्राञ्जनयति प्रलापं चापहन्ति। यत्र च नाड़ी प्रबलां मन्येत तत्र ताम्रभस्मापि–अर्धरक्तिकामितंदेयं हृद्यत्वात्।

---

१ अतएव—ज्वरे प्रमोहो भवति स्वल्पैरपि विचेष्टितैः।
निषण्णं भोजयेत्तस्मा न्मूत्रोच्चारौ च कारयेत्। इदमुच्यते।

दशवर्षपुराण घृतस्य महातिक्तघृतस्य शतधौत सहस्रधौत घृतस्य वा अनवरतं शिरसि लेपः। हिमजल शतधौत घृतंविशिष्ट फलदम्। सतगरवरतिक्ता इत्यादि। (भावप्रकाश सन्निपाताधिकारे) क्वाथश्च सिद्धः प्रलापे१। यत्र चान्त्रिके मृदुप्रलापः तत्र स्वल्पचन्द्रोदयः२ प्रयोज्यः।

मूर्च्छोन्मादगात्रकम्पभ्रमदौर्बल्यपार्श्वग्रीवास्थि वेदनादिषु शैत्ये प्रलापे, वाक्योच्चारणासामर्थ्ये कम्पनोन्मादवच्चेष्टाचित्तव्याकुलतादिषु कफप्रधान उन्मादे च मधुना तालशाखारसेन "चतुर्भुज रसो" (र० सा० सं० वा० व्या०) द्विरक्तिमात्र्यादेयः।

सन्निपातज्वरीयस्तु कम्पते प्रलपत्यपि किञ्चिदेव न जानाति
अभ्यञ्जयेत्पुराणेन सर्पिषा पूर्वमेवतम्।
बलारास्ना गुडूच्याद्यै स्तैलैश्चपरिषेचयेत्। (भा० प्र० सं०)

**श्वसनको लघुश्वासनलीप्रदाहश्च।**

द्वावेतौ प्रायो द्वितीयसप्ताहे दृश्येते, उरसि शीतं कासश्च श्रवणयन्त्रेणोरः परीक्षणे साँइ साँइ शब्दः श्रूयते। तत्र पुनर्नवा-निर्गुण्डीक्वाथेन श्वासकासचिन्तामणि, लक्ष्मीविलासादीनां

---

१ यत्र च प्रलापेऽतिसारःस्यात्तत्र कटुकारेवतादयोरेचकाः क्वाथतोऽपनेयाः। २ जायफल, लवङ्ग, कर्पूर, मरिचानां तोलकैकम् सुवर्ण कस्तूर्योः मिलित्वामाषकचतुष्टयंसपादचतुस्तोलकमितो रससिंदूरो मसृणीकृतस्य सर्वस्य रक्तिद्वयमितावटी वल्या वृष्या मृदुप्रलापघ्नी च पर्णपत्र रसेन देया हृत्सादे।

प्रयोगः। सैन्धवादि, बृहत्सैन्धवादि तैलादयोऽभ्यञ्जनीया द्विः, प्रत्यहं, उरसि पृष्ठे च, उष्णवस्त्रेणावेष्टनं परितः। अभ्यञ्जन-समये च गृहगवाक्षद्वाराणिपिहितानि कुर्यात्। श्वसनक-चिकित्सा चात्रानुसर्त्तव्या। भार्ग्यादिक्वाथ, अष्टाङ्गावलेह, वासावलेहैलादि चूर्णादयः कफसरलीकरणाय देयाः।

## छिद्रान्त्रमुदरम्।

यत्र ज्वरो हठात्साधारणतापमानतोऽपि ह्रसति तथोदरे सहसाऽसह्यावेदना, इत्थं झटिति शीताङ्गस्य लक्षणानिचेदापतेयु स्तथा आध्मान मुदरे स्पर्शाऽसहनता, श्वासे चोदरमुच्चावचं न भवेत नाड़ी च सूत्रवत्स्यात्तदाजानीयाच्छिद्रान्त्रोदरं जातमिति,अत्र हृत्सा-स्यविशेषतः सम्भावना अतो यथा हृत्कार्यं यथावत्तिष्ठेत्तथानुष्ठेयम्। कस्तूरी कर्पूर, वसन्तकुसुमाकर, मकरध्वजादयो यथावस्थं घण्टात्रयं मर्यादीकृत्यदेया। ऊर्णावस्त्रेणोदरवेष्टनं बन्धनपूर्वकम्, मध्ये मध्ये चाल्पशः शीतलजलपानम्। यदि आरोग्यलक्षणानि प्रकाश्येरन् तत्राऽदशदिनमापञ्चदशदिनं वा मलप्रवृत्तिर्निरोधनीया, पञ्चदश--दिनात्परं पिप्पल्यादितैलेन जैतूनतैलेन वा OLIVEOIL मात्रावस्तिः कार्या।

## आन्त्रिके सुरा Brandy प्रयोगसमयः

प्रागुक्तमान्त्रिके नाड़ी विशेषतः परीक्षणीयेति, यतो बीजमा न्त्रिकस्य रक्तेन सह मिलित्वा यदा कदापि हृत्सादं नाड़ीविकृतिं च कर्तुं क्षमइति, अतः प्रत्यहं प्रातः सायं नाड़ी विशेषतः परी-

त्तणीया कथमपि विकृतो रोगी वैद्यस्यापवादाय भवति, यदि कापि दुष्टिः हृदयस्य नाड्या वा प्रतीयेत तत्त्तणात्तदुपचारः करणीयः। त्वक्तैलं विन्दुप्रमाणमाभानिर्यासजलं माषकद्वयं सुराषष्टिविन्दु प्रमाणा ( १ ड्राम ) इत्येका मात्रा, एवमहोरात्रं, अर्धपलप्रमाणां सुरां वितरेत्, प्रपुराणो द्राक्षारिष्टो वा मात्रया, एवं कृते नश्यति हृत्सादः। स्त्रीस्तन्यदानेनापिहृत्सादो झटिति नश्यति। यदा पश्ये-द्विगतोहृत्सादः तदा सुरामात्रां ह्रासयेत् तदनु पञ्चदश विन्दुप्रमाण-मात्रया प्रतिवारं देया । कनकासवोऽत्रविंशते स्त्रिंशतो वा विन्दूनां मात्रया विशिष्टमुपकरोति यत्र च हृदयं वलवत्तत्र नादितो सुरावचारणीया।

## आध्मानम्

ज्वरवृद्धिक्रमेणाध्मानवृद्धिः, ह्रसिते ज्वरे आध्मानह्रासः क्वचित् प्रवलातिसृतावपि न ह्रासमेत्याध्मानमित्युक्तम्। चिकित्सा चात्र अन्त्रस्थान्त्रिकबीजघातिनी पूर्वोक्त त्वक्तैलादियोगः। किञ्च सरलतैलस्वेदश्च-तथाहि ऊर्णावस्त्र-मुष्णजलेनार्द्रीकृत्य निपीड्य च तत्र विंशति विन्दवः सरलतैलस्य प्रदेया स्ततः स्तदुष्णमेवोदरे स्थापनीयम् तच्चान्येन शुष्कवस्त्रेणा-ऽच्छादनीयम्। घण्टाचतुष्टयं मर्यादीकृत्य, अयं स्वेदो देयः, आध्मानोपशमो भवति। पिप्पल्यादितैलस्य मात्रावस्तिना गुदे पिचुधारणेन वा वायुर्निस्सरति, आध्मानोपशमश्च भवति। यव-चूर्णयवक्षार कुडवस्य तक्रेण कदुष्णलेपान्नश्यत्याध्मान मुदरपीडाच।

दारु हैमवती १ कुष्ठंशताह्वाहिङ्गु सैन्धवमिति–प्रत्येकं पल--प्रमाणं गृहीत्वा काञ्जिकेन कदुष्णलेपान्नश्यत्याध्मानम् । हिंग्वष्टक रसोनाष्टक, स्वल्पाग्निमुखादीनां वा सेवनात् । प्रबलाध्मानेऽपि तज्जन्यश्वासे च मलमूत्ररोधे गुडगुडाशब्देऽनिद्रायां, तण्डुलोदकेन एकवारं द्विवारं वा दिने तथा रात्रौ चतुर्मुखरसो ( र०सा०सं०) योज्यः । विशेषतोऽयं स्निग्धस्ततो वातपित्तजेषु तेषु तेषु रोगेषून्मादे च चमत्करोति ।

आध्माने उष्णस्निग्धस्वेदः, यथोक्ताश्चरसाः, मूत्रप्रवर्त्तका बाह्या आभ्यन्तराश्चयोगाः । वर्त्ति, वस्तिप्रयोगाश्च विधेयाः । मूत्ररोधेनाध्मातायां वस्तौ-उत्तरवस्तिशलाकया मूत्रं निःसारयेत् । मलाप्रवृत्ताबाध्माने च–समांशानां हिङ्गु सैन्धव मधूनां घृतलिप्तावर्ति गुदेदेया । अत्र रुद्धमूत्रपुरीषस्य गुदे वर्तिं निधापयेत् । पथ्ये च सावधानता । अन्ये चोपद्रवाः–यथा नासिकातोऽन्यत्र च श्लैष्मिककलातो रक्तस्रुतिः । अन्त्रावरणप्रदाहः, मज्जातन्तुदाहस्ततः पृष्ठवंशरज्जुविकृतेः पृष्ठे वेदना । मस्तिष्कदाहः, वृक्कदाहः, इतोऽप्यन्ये भवन्ति उपसर्गाः । ते चाकरेभ्योज्ञेयाः ।

## आरोग्योपक्रमावस्था ।

रोगान्तदौर्बल्यावस्थायां विशेषसावधानता कार्या । ज्वर त्यागादापञ्चदशदिनं द्रवं पथ्यमपहाय नान्यद्देयम् । भोजनकृते रोगी चिकित्सकं बहुशः पृच्छति, परन्तु कठिनं पथ्यं कदापि न

१ वचा

देयम् । सम्बोधनीयाश्च रोगिण आत्मस्वजना: परिचारकाश्च स्पष्टं, कथंचिदप्यपथ्यसेवने पुनराक्रमणस्य सम्भव इति । निवृत्तेऽप्यान्त्रिकेऽन्त्रे बहुतिथकालमवतिष्ठते व्रण:। तत्रैतादृशं पथ्यं चेद्दीयते यन्नजीर्यति ततः पुनरुदरवेदनया ज्वरसम्भवः । इदमेव "पुनरावर्त्तनं" नाम् । पुनरावृत्ते चान्त्रिके रोगिणो जीवनं संदेहमापद्यते । यस्य चाराग्योपक्रमावस्थायां विट्सङ्ग स्तत्र दिनमेक मतिक्रम्य पिप्पल्यादितैलादिना, अर्धपलेन मात्रा वस्तिः प्रदेया । यत्राहारादीनां व्यतिक्रमेणोदरवेदनातिसारश्च स्यात्तत्र लवणभास्कर, वृहच्छंखवट्यादिभिरुपाचरेद् घण्टाचतुष्टयं मर्यादीकृत्य तिसृभिश्चतसृभिर्वा मात्राभीरोगोपशमःस्यात् । पथ्ये च सावधानता ।

## पथ्यम् ।

१. ज्वरत्यागात्पर मापञ्चदशदिनं यवमण्ड, मोरट, दाड़िमरस मुद्गपटोलादियूषाष्टगुणमण्डाद्यन्यतमं देयम् ।

२. ततः परं करपट्टिकाबल्कलं, गोधूमसत्वकरपट्टिका, ( रवे की रोटी ) मांसयूषमांसार्कौ, दुग्धखण्डं प्रातर्दशवादनसमये, चतुर्वादनसमये दुग्धं फलरसः सागु र्वा, एवं विधंपथ्यं दिनत्रयं देयम् । ततः परं [ ४१ दिनात्परम् ] पुराणतण्डुलौदनं, मानमण्डो नारङ्गस्वरसः । एवं सप्तसुदिनेषु व्यतीतेषु, ईषदुष्ण जलेन शरीरपरिमार्जनं दिनमेकं दिनद्वयं वा, तत उष्णजलेनैव स्नानम् । अत्राप्यारोग्योपक्रमावस्थायां वलवृद्धये कान्त्यै शिरसि केशोद्गमायञ्चदभिवृद्धये च च्यवनप्राश, मकरध्वज,प्रवाल, कुपीलु

योगाः, प्रदेयाः । भोजनात्परं पुराणो द्राक्षारिष्टः, अपुराणासुरा, वा अर्धपलमात्रया जलेन देया ।

## आन्त्रिकज्वरिणोऽशुभोदर्का उपसर्गाः ।

१. यत्र प्रात ज्वर १०४° स्तापमानेन, साय १०५°, मापञ्च-दिवसमासन्नदिवसं वा समभावतया तिष्ठति ।

२. यत्र वा नाड़ीसंख्या प्रतिमिनटं १३० तोऽप्यधिका ।

३. किञ्च श्वाससंख्या प्रतिमिनटं त्रिंशत्तोऽप्यधिका स्यात् ।

४. यत्र वा सम्बोधितो रोगी उत्तरं न ददाति, अनेक वारं वा सम्बोधितो वाक्स्खलनं कृत्वोत्तरं ददाति ।

५. यदि वा अज्ञानो ऽर्धज्ञानोऽपि च भवति ।

६. यत्र वा वक्तुमना वाक् स्खलितं ब्रूते ।

७. यद्वा प्रलपति, उत्तिष्ठति इतस्ततो हस्तपदविक्षेपं करोति।

८. अज्ञानावस्थायां गुवति मूत्रयति वा ।

९. अथवा जिह्वा शुष्का, खरस्पर्शा, श्याववर्णचिह्नयुता, मलिना, जिह्वां प्रदर्शयेत्युक्ते सर्वथा दर्शयितुमसमर्थो वहिष्कर्त्तु मनाः कम्पते वा ।

१०. किम्वा विष्टराच्छादनवस्त्रमात्मनो वस्त्राणि शाटिकां वा आकर्षति ।

## सम्भवे चैषां लक्षणानामियं विधातव्या चिकित्सा ।

भवन्ति चैतानि लक्षणानि मस्तिष्क हृदय फुस्फुसकेन्द्राणां विकृत्या, यत्र च पश्येद्रोगिणो नाड़ीसंख्या प्रतिमिनटं १३०

तोऽप्यधिका शुष्का श्याववर्णमलयुता जिह्वा वेपते विस्मरति प्रलपति अन्ये च प्रलापोपसर्गाः सर्वे प्रकाशन्ते, तत्र मकरध्वजो १ र० मितः, कस्तूरी १॥ र० इत्येकामात्रा मसृणीकृता मधुना पर्णपत्ररसेन वा देया घण्टाचतुष्टयंमर्यादीकृत्य, एवमहोरात्रं षण्मात्रा प्रदेया। सुरा पुराणो द्राक्षारिष्टो वा मात्रया [ मात्रा च सुराया ६० विन्दवः ] घण्टात्रयमर्यादया उभयं वा युगपत्क्रमेण। यत्र च नाड़ी क्षीणतरा गणनायां प्रतिमिनटं १४० तोऽप्यधिका एकवारं द्विवारं वा न लभ्येत [ स्थित्वा स्थित्वा चलति ] तत्र, अर्धोष्णजलमिश्रितनारङ्गरसो, मिष्टनिम्बूकरसो, खण्डमिश्रितो मोरटो वा प्रचुरो देयः। तन्त्रान्तरीया "ग्लूकोज" जलेनात्र ददते। ग्लूकोजः१ Glucose शर्कराविशेषः। ईषत्पीतो जले द्रवति, अवलेहरूपोऽपि ( Syrup ) भवति अयमपरिवर्त्तित एव रक्तेन सह मिलति। गुदमार्गेण प्रवेशित श्चान्यद्रवापेक्षया त्वरितं फलति।

अमृतकल्पो वृहत्कस्तूरीभैरवः—( र० सा० सं० ) सन्निपातस्य सर्वास्ववस्थासु सर्वशरीरशीतलतायां नाड्याः स्थानत्यागे ज्ञानलोपे उन्मादवद्भावे, इत्यादिषु मृत्युसूचकलक्षणेषु एवं वातजविकार,

---

१ क्षीणानां रोगिणामुपकारकारि पथ्यमान्त्रिके च बहूपयोगमायाति। मुखेन निगलनासमर्थे रोगिणि गुदमार्गेणाऽर्धप्रस्थ जले २६२॥ रक्तिका-मानो प्रतिषड्घण्टं सत्यावश्यकतायां ततस्त्वरितं वा प्रयुज्यते। श्वासे शिशूनां वमनेऽपि प्रयुज्यते।

सूतिकासन्निपात, रक्तपित्तादीनां विषमावस्थायां विषमज्वरे च वातकफप्रधाने, सर्वविधसन्निपातानां निरामावस्थायां कफकास-दुर्बलता शिरोगौरव कार्यानिच्छादिलक्षणेषु च तैस्तैरनुपानै रसायनोऽयं प्रयोक्तव्यः। सिद्धार्थकलेपः। सन्निपातस्याज्ञानावस्थायां नाड़ीगतिविपर्यये शीतांगे च अर्धपलं श्वेतसर्षपमुष्णजलेन मर्दयित्वा वस्त्रखण्डे प्रसार्य पार्श्वयोरुरसि च निवेशनीयः समागते ज्ञाने स्वस्थानागतायां नाड्यां च तमपसार्य नवनीतलेप स्तत्र कार्यः।

कस्तूरीयोगः—श्लेष्मकोपाद् घर्माधिक्याद्वा शीतावस्थायां नाडीविपर्य्यये चार्धघण्टामर्यादया–"कस्तूरी ४ र० मृतसंजीवनी-सुरा सुरा वा पलमिता मिलितयो र्मात्रार्धतोलकमिता" देयः।

श्लेष्मसुन्दर-वृहत्कफकेतू—यत्र सन्निपाते कफकोपादतितन्द्रा ज्ञानलोपौ कफसञ्चयादुरसि घड्घड् शब्द स्तत्र घण्टाद्वयमर्यादयाऽहोरात्रं तालशाखारसेन मधुना वा पर्य्यायेण पृथग्वा इमौ प्रयोज्यौ भवत्याभ्यां कफनाशाद् ज्ञानसंचारः। मुक्तासुवर्णयोस्तोलक प्रवाल-भस्मनः १ तो० अभ्रस्य २ तो० सुवर्णसिन्दूरस्य ४ तो० स्तन-दुग्धेनमर्दयित्वा द्विरक्तिमात्रा वटी विधेया। इति वृहत्कफकेतुः।

सुवर्णरौप्यलौह-माक्षिक-रससिन्दूर-स्वर्णसिन्दूरमुक्तापारद-गन्धक-त्रिकटूनां समभागानां जलेन द्विरक्तिमानावटी श्लेष्म-सुन्दरस्य विधेया।

वातकुलान्तकः—सन्निपाते–वातप्रबले वातपित्तप्रवले च बुद्धि-भ्रंसोन्मादाक्षेपेषु मूर्च्छा–प्रवलप्रलाप--कम्प–निद्रानाश श्रवणहानि–

विकृतदर्शन-पक्षाघात--भयोद्रेकेषु च बलामूलरसेनमधुना—प्रत्यहं त्रिर्वातकुलान्तको ( र० सा० सं० ) देयः ।

स्वर्णकस्तूरीरसः—यत्र सन्निपाते बहुप्रलापवाक्योच्चारण — मूर्च्छा-स्वेद गात्रपीडा प्रबलपार्श्व वेदनाऽनिद्रा ऽऽध्मान नासाग्र-शीतलता बधिरता दाह मत्तता कम्पमोह सन्धिशोथ वेदना चित्त व्याकुलता गान-हास्य शीताङ्ग हनुस्तम्भादय स्यु स्तत्र आर्द्रकरसेन मधुना च "सुवर्णकस्तूरी रौप्याभ्रप्रवाल मुक्ता हरिताल माक्षिक स्वर्णसिन्दूर जातीफल जातीपत्राकर्पूरैला लवङ्ग दारुसितानां सम-भागानां जलेन द्विरक्तिमितावटी देया स्वर्णकस्तूरीरसस्य ।

सूचिकाभरणः-सन्निपाते चैतन्यलोपे, प्रश्वासवायोः शीतल-तायां, नाड्या विशृङ्खलतायां गतिहीनतायां वा सर्वतः शरीरस्य शीतलतायां वातश्लेष्मकोपे पुनः पुनः स्वेदेन नाडीगतिलोपे (हृत्सादे) वा नारिकेलोदकेन नारङ्गरसेन वाऽयं योज्यः ।

कृष्णसर्पविष—विष सोमलाः (दारुभुज) समभागाः सर्वसमं हिङ्गुलं जलेन मर्दयित्वा ततो रोहितमत्स्य शूकर महिष छाग मयूर पित्तैरेकैका भावना देया, वटीसर्षपमात्रा सूचिकाभरणस्य । याव-न्नासावायोर्नोष्णता, नाड्याश्च न स्वस्थता तावदर्धघण्टाकालेन देया; यदा च नेत्रयो रारक्तता तदा शिरसि तिलतैलं मर्दयित्वा शीतल जलधारा प्रदेया । प्रचुरशैत्याऽप्रयोगे रोगिणोऽनिष्ट-सम्भावना । शिशु वृद्ध गर्भिणीनाञ्च नायं योज्यः । पूर्वोक्ताया मेवावस्थायामुक्तकल्पेनैव 'वृहत्सूचिकाभरणोऽपिसर्षपमात्रया देयः। मृतकल्पे प्रयुज्येते इमौ रोगप्राबल्यानुरोधेन चत्वारः पञ्च षड्वा

वट्यो देयाः। निगिलनासमर्थे रोगिणि मस्तके काकपदं ( क्षतं। ) कृत्वा तद्द्वारा प्रयोगो विधेयः।

रस गन्धक नागा अविष कृष्णसर्पविषाणां समभागानां प्रथमं जलेन ततः पञ्चपित्तैः प्रत्येकैः सप्तधाभावितानां सर्षपमात्रा वटी विधेया वृहत्सूचिकाभरणस्य।

बालान्त्रिकः—द्विधा गतिरस्य बालेषु मृदु गुरुतरा च। मृदौ शिशुः प्रथमं दिनैकं दिनद्वयं वा अलसो न क्रीडति, सर्वदा स्वपीति, न च सम्यङ् निद्राति रात्रौ, इतस्ततो लुण्ठति, समयेऽस्मिन् ज्वरश्च १०३ तोऽधिको न भवति। किमपि प्रलपति, द्वितीयसप्ताहान्ते प्लीहा ईषद्विवर्धते। तथाऽन्ये चोपसर्गा मृदुतया प्रकाशन्ते। अस्मिन् द्वितीयसप्ताहान्ते तृतीयसप्ताहान्ते वा स्वावस्थां याति तापः। पुनरस्यां कदाचिद्द्व्यंशं त्र्यंशं वा दिनद्वयं दिनत्रयं वा वर्धते ज्वरः। ततः सर्व, उपसर्गा क्रमेणापगच्छन्ति।

गुरुतरायां ज्वरः १०५–१०६ यावद्भवति, चतुष्पञ्चदिनेष्वेवमेव तिष्ठत्यपि च, प्रलापेन सह अरतिर्निद्रानाशः नासिकातो रक्तस्रावः, शुष्यति जिह्वा, आधमत्युदरम्, प्रतिघण्टं चतुःपञ्चकृत्वो वाऽतिसरति, अतिदुर्बलश्च, प्लीहा वर्धते, अर्धनिद्रितावस्थो न (प्रमीलकः) दद्दात्युत्तरं सम्बोधितः, बधिरता चात्र प्रधानं चिन्हम्।

आद्योपश्चान्त्रिके प्रायो न दृश्यते। अन्ये चोपसर्गा यूनामिवैव भवन्ति।

## रोगनिर्णयः।

ज्वरोत्पत्तेः कतिचिद्दिनानन्तरं लक्षणान्तराणि दृष्ट्वा क्रियते

निर्णय आन्त्रिकस्य। प्रथमं त्रिषु चतुर्षु वा दिनेषु सर्वत्र रोग-निर्णयो दुरूहः। केषाञ्चिद्विशेपलक्षणानामदर्शनात्। तानि च विशेषलक्षणानि यथा—आध्मानं, क्रमेण ज्वरवृद्धिसूशनैर्वल्ये, उदरगौरवमीषद्वेदना च, दक्षिणवंक्षणोत्तरिकप्रदेशपीडनादस-हनता, शिरोरुजा, क्विणसेवनान्न ज्वरह्रासः। जिह्वा मलिनता तदग्रभागस्य प्रान्तयो श्चारक्तता। नाड़ी-गतिमन्दता अस्त्यस्मिन्ना-ड्या वैशेष्यम् यन्नाड़ीगति र्ज्वरतापापेक्षयाऽल्पा भवति।

"प्रायोऽयं प्राकृतिको नियमोऽन्येषु ज्वरेषु"–यदा ताप एकाशं वर्धते, तदा नाड़ीगति रष्टवारं वर्धते। एवं यत्र ज्वरस्त्र्यंशं वर्धते नाड़ी चतुर्विंशतिवारान् वर्धते। यथा—यत्र—ज्वरः ९९.४ तः १०० भवति नाड़ी तत्र ७२ तः ९५ भवति। यत्र च तापः १०५ स्यात् तत्र च नाड़ी गतिः १२०--१३० समीपं गच्छति। आन्त्रिके च तापे १०५ अंशं गतेऽपि १००–११० तोऽधिका न भवति हृदयस्य क्षीणतायां नाड़ीगति र्वर्धते, इति तु रोगस्य कठिनावस्था सूचकम्। इत्येतेषु लक्षणेषु प्रकटितेषु आन्त्रिक इति भवति सन्देहः। प्रथमत एव ज्वरेण सहातिसारे मस्तिष्कविकृतौ चान्त्रिक इति निर्णयः। लक्षणान्तर मान्त्रिकस्य यद्रोगी स्वाँगुल्या ओष्ठकलाँ प्रलुञ्चति, तत श्च ततो रक्तं वहिष्करोति। रक्तपरीक्षयान्त्रिकाणु-लाभे च न संशयः। द्वितीयसप्ताहात्प्राक् च रक्ते तदणु र्न लभ्यते।

प्रायः शिशवः प्रतिशतं ९९ संख्याका आरोग्यं लभन्ते।

## लक्षणानि चैतानि मङ्गलकराणि।

१. यत्र प्रातर्ज्वरः १०१--१०२ सायम् १०३--१०३॥ भवति

२. सामान्यातिसारः । ३ सामान्यमाध्मानम् ४ उदरस्योपरिपीडनान्नवेदनानुभवः । ५ आर्द्रा जिह्वा न शुष्का । ६ यत्र तृतीयसप्ताहे ज्वरः प्रातः सन्ध्यापेक्षया ऽयंशं विरमति, एवं क्रमेण सायं ज्वरविरामः । एतल्लक्षणवैपरीत्ये विशेषभयसम्भावना। इतोऽप्युदराद्रक्तस्रावे यद्यज्ञानो रोगी तत्राप्यमङ्गलम् । यत्र च न प्रलापः, अतिसारश्च भवति तच्च शुभं लक्षणम् । येषां भवति विट्सङ्गस्ते चाल्पायासेनैव सिद्ध्यन्ति ।

१—सर्वस्मिन्भूमण्डले ऽयं, शीतप्रधानानां देशानामपेक्षया उष्णप्रधानेषु, ग्रीष्मे वर्षासु च विशेषेण दृश्यते ।

२—विहायैनमेतत्समानाकारप्रकारौ द्वौ जीवाणू ।

Paratyphoi d. A. Paratyphoi d. B. उपान्त्रिकानुपान्त्रिकौ । लभ्येते ।

एताभ्यां जातो ज्वरोऽपि भवति तल्लक्षण एव किन्तु न तावत्तीव्रः । स चादशदिन मापञ्चदशदिनं तिष्ठति । चिकित्साप्यान्त्रिकस्येव ।

३—रोगमुक्तस्या ऽपि लभ्यते ऽस्य बीजं मले, केषाञ्चन तु यावज्जीवम् ।

४—अस्थिन तत्कलां गतो वा तत्र वर्षगणेना ऽपि विद्रधिं जनयति ।

५—प्रायश, एकवारमाक्रम्य द्वितीयवारं नाक्रामति यावज्जीवम् ।

६—एकस्मिन्नेव वर्षे तु एकस्यैव, द्वावाक्रमणौ दृश्येते ।

७—साधारणावधिः सप्ताहचतुष्टयं । कदाचित्पञ्चसप्ताहत आदशसप्ताहं वा तिष्ठति ।

## क्षयजमस्तिष्ककलाप्रदाहेन सहान्त्रिकस्य विभेदः ।

### प्रथमावस्था ।

| क्षयजमस्तिष्ककलाप्रदाहे । | आन्त्रिके । |
|---|---|
| १ सप्ताहै र्मासै र्वा क्रमशः शीर्णता भवति। | १ कञ्चित्कालं स्थिते ज्वरे भवति शीर्णता । |
| २ रोगिण उग्रस्वभावो दीर्घकालमनुवर्तते, निद्रितेऽप्युग्रता । | २ स्वभाव श्च नोग्रो विशेषतः, निद्रिते च स्थिरो भवति । |
| ३ असह्यो भवत्यालोकः । | ३ एतन्न वर्तते । |
| ४ तापस्य न कापि विशेषावस्था प्रातर्वर्धतेऽपि च सायं समभाव तयैव तिष्ठति च । | ४ तापो विशेषक्रममनुसरति क्रमेण वर्धते भवति च सायं प्रातरपेक्षयाऽधिकः । |
| ५ अकस्माद्वमनम्, नाहारेणाऽस्य सम्बन्धः जिह्वा परिष्कृतापि भवति । | ५ आमाशये संयतदुग्धस्य,अन्यपथ्यस्य, स्थितेः, कटुकौषधसेवनाद्वा भवति वमनं जिह्वा च समला । |
| ६ अहोरात्रं शिरः पीडायाः कदापि ह्रासवृद्धी न भवतः । | ६ प्रवृद्धे ज्वरे सायं वर्धते शिरः पीडा । |
| ७ प्रायशः सततं विट्संगः । | ७ अतिसारः क्वचिद्विट्सङ्गः । |
| ८ पीडिते चोदरे वेदना न भवति | ८ पीडिते चोदरे वेदना, एवमाध्मानम् । |

| | |
|---|---|
| ९ उत्तमं नाड्या आयतनं गतिश्च मृदुः कदाचिदनियमिता सा । | ९ नाड़ी द्रुतगतिः कोमला नानियमिता । |
| १० नस्तो न प्रवर्त्तते रक्तम् । | १० नस्तो रक्तं प्रवर्त्तते । |

## परिवर्धितावस्थायाम् ।

| | |
|---|---|
| १ तापोऽनियमितो न वा भवति । | १ अविरामो ज्वरः समभावतयैव तिष्ठति, क्रमशो वा वर्धते, अपेक्षया प्रातः स्वल्पं विरमति |
| २ प्रायः शाम्यति वमनम् । | २ भुक्तं द्रव्यं वमनेन सह निर्गच्छत्यपि |
| ३ सततं प्रमीलकः, न च सुखेन जागरितुं शक्यते रोगी, एवं क्लेशेन जागरितोऽपि नातिचिरात्पुनः पूर्वावस्थां याति । | ३ सुखेन जागरितुं शक्यते कञ्चित्कालं जागृतश्च जलमिच्छति, जागृतस्य च प्रायो ज्ञानस्य न वैलक्षण्यम् । |
| ४ महानविट्सङ्गः । | ४ प्रायोऽतिसारः मलं पीत मीषद्रक्तं वा । |
| ५ उदरमधो याति । | ५ पीडिते चोदरे वेदनाऽध्मानं च |
| ६ नखेनाहते चर्मणि तत्स्थानं स्फीतमारक्तं च भवति; गण्डदेश स्तथा स्थानान्तराणि निपीडितावस्थानि स्वतः सहसा वा आरक्तानिभवन्ति । | ६ गात्रे च रक्ता विन्दव-उद्गच्छन्ति । |

| | |
|---|---|
| ७ छिन्नश्वासः १ | ७ श्वास श्च काले काले भृशम-नियमितो दीर्घ श्च, एकस्मि-न्दिने ऽनियतः तदपरदिने सर्वशो नियतः । |
| ८ नाड़ी अतिशयेना ऽनियमिता | ८ नाड़ी नियमिता क्षीणा च । |
| ९ प्रदेशीयः पक्षाघात आक्षेप श्च अक्षिगोलकं स्थिरं कनीनिका, असमा अप्रसृता वा । | ९ एतानि लक्षणानि न भवन्ति । |
| १० उदूखलोर्ध्वप्रदेशे पीडना त्प्रबला वेदना । | १० नैवं भवति । |

इत्यान्त्रिकः सन्निपातः ।

श्रीघनानन्दपन्तेन चिद्घनानन्दचेतसा ।
यद्घनानन्दतो लब्धं घनानन्दे तदर्पितम् ॥

---

१ Cheyne-stokes respiration

## श्वसनकः१ Pneumonia

फुस्फुसप्रदाहे श्वासस्य स्पष्टं दर्शना च्छ्वसनयन्त्राक्रमणा च्च "श्वसनक" इत्याख्यायते ऽयं प्रदाहः । फुस्फुसस्य स्वाभाविकी अवस्था मधुशून्य मक्षिकापटलस्येव श्वसनके च सा संहता भवति।

### उत्पत्तिकारणम् ।

श्वसनको ऽपि एकस्मात्कृमि Pneu macoccee or Diplococcee त उत्पद्यते पश्चाच्च कुष्ठवद्दोषानुबन्ध इति। शीतवर्षादि-पूतिगन्धयोगेनाभिघातेन कुत्रचिद् व्याधिना वोत्पद्यते२ ।

---

१ भावप्रकाशे च सूत्ररूपेण कर्कटके एतस्य लक्षणानि गुम्फितानि । यथा- रक्तमालक्तकेनैव लक्ष्यते मुखमण्डलम् । पित्तेनाकर्षितः श्लेष्मा हृदयान्नप्रसिच्यते । इषुणेवाहतं पांर्श्वं तुद्यते खन्यते हृदि । प्रमीलकः श्वासहिक्का वर्धते तु दिने दिने । जिह्वा दग्धा खरस्पर्शा गलः शूकैरिवावृतः । विसर्गं नाभिजानाति कूजेच्चापि कपोतवत् । अतीवश्लेष्मणा पूर्णः शुष्कवक्त्रौष्ठतालुकः । तन्द्रानिद्रातियोगार्त्तो हतवाग्निहतद्युतिः । न-रतिं लभते नित्यं विपरीतानि चेच्छति । आयम्यते च बहुशो रक्तं ष्ठीवति चाल्पशः । एष कर्कटको नाम्ना सन्निपातः सुदारुणः । श्वासहिक्का इत्यत्र श्वासकासौ वर्धते तु दिने दिने इतिपाठः प्रतिभाति । श्वासेन सह कासस्य विशेष सम्बन्धात् ।

२ दशवर्षतो न्यूनवयसामेवं विंशतितः पञ्चाशद्वर्षमध्यवयसां, स्त्रीणामपेक्षया पुरुषाणां प्रायो विशेषेण भवति ।

## त्रिविधो ऽयम् ।

१ समग्रस्यैकस्य, फुस्फुसस्य प्रदाहः स्तदेकखण्डस्य वा प्रदाहः१ ।

३ अन्यरोगोपसर्गरूपेण वा प्रदाहः, यथा—आन्त्रिक मसूरिकादौ श्वसनकदर्शनात् ।

## प्रथमस्य तिस्रोऽवस्था भवन्ति ।

प्रथमा—अस्यां फुस्फुसे रक्ताधिक्यं जायते । द्वितीया—अस्यां फुस्फुसान्तस्था वातकोषाः Aircells प्रदाहत एकविधनिर्य्यासवत्कठिनद्रव्येण परिपूर्य्यन्ते । तृतीया—अस्यां वातकोषेभ्यः निर्य्यासवत्कठिन द्रव्यस्यकोऽपि भागो विलीयते कियानंशः कफेन सह वहिरायाति ।

## श्वसनकस्यबाह्यलक्षणानि Clinical Course of Pneumonia.

श्वसनके, आदित आसमाप्ति के के उपसर्गा दृश्यन्ते ।

१ सहसा सकम्पो ज्वरः ।

२ स च चतुरुत्तरं १०४° पञ्चोत्तरं १०५° वा शतं यावत् ।

३ कपोलद्वयमालक्तकरक्तमिव दृश्यते३ ।

---

१ श्वसनके फुस्फुसस्य केष्वपि पुञ्जेषु किम्वा सर्वस्य उभयोर्वा प्रदाहो भवति, कदाचित्तदावरणमप्यल्पाधिकं विदह्यते ।

२ श्वासस्य एकासंख्या च श्वासप्रश्वासयोर्मिलितयो ग्राह्या ।

३ रक्तमालक्तकेनैव लक्ष्यते मुखमण्डलम् भा० प्र० ।

४ द्रुतानाड़ी प्रतिमिनटं शततः १०० त्रिंशदुत्तरशतं १३० यावद्भवति ।

५ श्वासः-प्रतिमिनटं त्रिंशत्तः ३० पञ्चाशत् ५० पञ्चपञ्चाशत् ५५ वा यावद्भवति । इदमत्रावधेयम् । प्राकृतिकी नाड़ीसंख्या प्रतिमिनटं सप्ततिः ७० पञ्चसप्तति ७५ र्वा भवति यूनः । श्वाससंख्या च सप्तदश अष्टादश १७-१८ वा भवति प्रतिमिनटम् । अत्र यावता कालेन श्वासप्रश्वासौ, एकवारं भवतः स्तावतैव कालेन नाडिका चतुः स्पन्दते इति प्राकृतिको नियमः । श्वसनके च नाड़ी श्वासगत्यनुपातयो र्व्यतिक्रमो भवति । यथा–यावता-कालेन श्वासप्रश्वासौ, एकवारं भवत स्तावता नाड़ी द्विःस्पन्दन्ते, कदाचित्सार्धं वा १॥ यद्वा एकस्मिन् मिनटे नाड़ी द्विसप्तति ७२ वारं स्पन्दते, श्वासप्रश्वासौ च अष्टादशवारं भवतः । श्वसनके च यदि नाड़ी प्रतिमिनटं शतं १०० स्यात् श्वासप्रश्वासौ पञ्चाशद्भवतः, एष व्यतिक्रम श्च श्वसनकनिर्णये प्रधानं कारणानाम् ।

बालानां प्राकृतिकी नाड़ीसंख्या प्रतिमिनटं प्रायः शतं १०० श्वाससंख्या च पञ्चविंश २५ ति स्त्रिंश ३० द्वा भवति ।

६ एकविधा१ सर्षपिका Herpeslabialis.

७ अहोरात्रात्परं एकत उभयतो वा वक्षसो वेदना२ मनुभवति, कसने हिक्कने चैषा वर्धते ।

---

१ एषा सर्षपिका एकवारमेव सर्वा निर्गच्छति ।

२ इपुणेवाहतं पार्श्वं तुद्यते ।

८ कासः–कसने ऽत्यल्पो निर्य्यासवद्गाढ़ः१ कफो निस्सरति, दृश्यते चात्र कदाचिद्रक्तम्२।

९ महाश्वासः--( श्वासप्रश्वासयो रतितरां क्लेशः )

१० प्रलापः–

११ क्वाप्यतीसारः।

१२ हृत्सादः।

श्वसनके ज्वरः षष्ठनवमदिनयो र्मध्ये, एकान्ततो विसर्गं करोति, यथा--१०४--१०५ शतत स्तापमानं त्वरितं ९६--९७ संख्यां यावद-वतरति Crisis। प्रायो दक्षिणपार्श्वाधःखण्डमाक्रामति श्वसनकः।

## श्वसनकस्याभ्यन्तरलक्षणानि ३

ताडने श्रावणे च किं लक्षणं प्राप्यते। कि तावत्ताडनं किं च श्रावणं नाम? ताड़नम्—रोगिणः पार्श्वास्थ्नोर्मध्ये वामहस्तस्य मध्यमाङ्गुलिं सन्निवेश्य तदुपरि दक्षिण हस्तमध्यमाङ्गुल्यग्रभागेना-ऽहननं ताड़नं ( प्रतिघातः Percussion ) नाम।

श्रवण यन्त्रेण Stethescope रोगिणो हृदयस्य फुस्फुसस्य च परीक्षणं श्रावणं Auscultation नाम।

किमप्यन्तः सुषिरं वस्तु यथा स्वाभाविकः फुस्फुसः, अस्योपरि आहनने यः शब्दः श्रूयते सो ऽस्य मसंहतध्वनि Resonance

---

१ श्लेष्मा हृदयान्न प्रसिच्यते।

२ रक्तं ष्ठीवति चाल्पशः।

३ Physical signsofpneumonia.

र्नाम । तथा किमपि संहतं वस्तु यथा काष्ठं मस्योपरि ताड़ने यः शब्दः श्रूयते सः "संहतध्वनि" Dulness र्नाम ।

अथ श्वसनके जाते ताड़ने कीदृक् ध्वनिः श्रूयते । प्रागुक्तं फुस्फुसस्य स्वाभाविकी स्थितिरन्तः शुषिरा मधुरहितस्य मधु-चक्रस्येव स्पञ्जस्येव वा ।

श्वसनके जाते फुस्फुसस्य संहतीभावो भवति ततश्च संहत वस्तूपरिताड़ने संहतध्वनिः Dull sound प्राप्यते ।

श्वसनकस्य प्रथमावस्थायां पूर्णतया संहतध्वनि र्न श्रूयते,किन्तु संहतध्वनिलेशः । ततः परं यदा सर्वेषां फुस्फुसतन्तूनाँ Lungtissue संहतीभावो भवति तदा ताड़ने सम्पूर्णो संहतध्वनिः श्रूयते ।

## श्वसनके श्रावणे किं लक्षणं लभ्यते ।

१—फुस्फुसे यत्र संहतध्वनि स्तत्र श्रवणयन्त्रेण परीक्षणे श्वास समये केशमर्दनध्वनिः श्रूयते । अङ्गुष्ठतर्जनीभ्यां शिरः केशानां मर्दने यो ध्वनिरुत्पद्यते तद्रूपैव ध्वनिः श्वसनके श्रूयते एष एव "केशमर्दनध्वनि" र्नाम । ततः परं यदा फुस्फुसान्तर्वायुकोषाः कफपूर्णतया संहता जायन्ते तदा बालमर्दन ध्वनि र्न श्रूयते ।

कदाचिच्च फुस्फुसावरणकलाप्रदाहे सति घर्षणध्वनिरपि श्रूयते ।

## प्रवृद्धस्वरयन्त्रशब्दः ।

रोगिणो यस्मिन्पार्श्वे श्वसनकः, तत्र श्रवण यन्त्रं सन्निवेश्य— एको द्वौ, त्रय इत्युच्चार्यतामिति वाच्यः, उच्चरिते च तत्र यः शब्दः कर्णगोचरो भवेत्तदनु स्वस्थपार्श्वोपरिश्रवणयन्त्रं सन्निवेश्य

पूर्ववदेकाद्युच्चारणे कारिते शब्देनानेन सह तुलनायां अस्वस्थपार्श्व-शब्दस्य, उच्चैरुच्चरणं प्रतीयते, अस्यैवोच्चैरुच्चरणस्य "प्रवृद्ध-स्वरयन्त्र शब्द इति नाम । १ Bronchophony.

## प्रवृद्धं स्वरोत्कम्पनम् ।

यथा प्रवृद्धः स्वरयन्त्रशब्दः परीक्षितः, तद्वदिदमपि परीक्ष्यते, प्रभेद श्चात्र पार्श्वे ( स्वस्थपार्श्वे ऽस्वस्थपार्श्वे च ) श्रवणयन्त्रस्थाने चिकित्सकस्य करतलं निवेश्यते, ततः पूर्ववदेकाद्युच्चारणे कारिते, स्वस्थ पार्श्व शब्दापेक्षया, अस्वस्थ पार्श्व शब्दः प्रवृद्धो ऽनुभूयते । अस्यैव करतलानुभूतप्रवृद्धरुग्णपार्श्व शब्दस्य "प्रवृद्धं स्वरोत्कम्पनं नाम" ।

## श्वसनकचिकित्सा ।

१ प्रबलो ज्वरो १०४--१०५ शसेति, नाड़ी १२०तः १५० । श्वासः ( श्वासप्रश्वासौ ) ४५तः ५५--६०यावत्प्रतिमिनटं भवति । प्रागुक्तं यच्छ्वसनकस्य एकविधसूक्ष्मक्रिमिविशेषत उत्पत्तिरिति, ततः क्रिमिसंख्याप्राबल्ये ज्वरप्राबल्यं क्रिमिनाशे ज्वर नाशः१ । तत्र–श्वासचिन्तामणिः निर्गुण्डी पत्ररसेन क्वाथेन वा घण्टावीणा२, पत्रक्वाथेन वा मधुमधुरीकृतेन घण्टाचतुष्टयं मर्य्यादीकृत्य देयः श्वसनकज्वरे । ज्वरस्याधिक्ये शिरसि हिमपोट्टली प्रयोगः, हिम-

---

१ श्वसनकक्रिमिविघाताय किणसत्वं Qunine प्रधानतमं मन्यन्ते प्रतीच्याः, न च श्वसनके किणसत्वप्रयोगे संकोचमायान्ति ते ।

२ Digitales.

जलेन शतधौतसहस्रधौतघृतस्य वा लेपोऽनवरतम् । ज्वरे च १०२ तोऽधो गते हिमपोट्टलिकापसारणं पुनश्च १०३ संख्यां गते प्रयोगः । यदा च पश्येत् नाड़ीश्वासप्रश्वासयो द्रु तभावो ज्वर श्च ह्रासमितः तदा घण्टावीणा१ योगो न विधेयः, श्वासचिन्तामणि श्च षड्घण्टां मर्य्यादीकृत्य देयः । वृद्धानां घण्टावीणायोगः प्रतिषिध्यते । श्वसनके हिमप्रयोगे न कदाचिदपिभयं कार्यम् । रिक्तपित्तं द्विरक्तिमात्रया श्वसनके घण्टाचतुष्टयं मर्य्यादीकृत्य जलेन दत्तमसाध्यावस्थामपि निस्तारयति चमत्करोति च । हृद्दौर्वल्ये कस्तूरिकया सह देयम् ।

## पार्श्वशूलम्२

पार्श्वशूलेन कातरो भवति रोगी—तत्पार्श्वेन शयितुमक्षमो भवत्यतो ऽस्य त्वरितं चिकित्सा विधेया ।

(क) अतसीखलेन तदभावे गोधूमचूर्णतुषेण वा उपनाहस्वेदो विधेयः, तत्र चाहिफेनासवो ऽपि ३० विन्दुमात्रया प्रक्षेप्यः । घण्टाद्वयं मर्य्यादीकृत्य चोपनाहोऽ यं पुनः परिवर्त्तनीयः । यत्र च नास्य प्राप्तिः ।

(ख) तत्र मसृणीकृतराजिकोपनाहो३ देयः—तथाहि—जलेन मसृणपिष्टां राजिकां एकस्मिन्वस्त्रे प्रसार्य तद्वस्त्रस्य पार्श्वभागः ( यस्मिन्पार्श्वे राजिकालेपो नास्ति स भागः ) वेदनास्थाने

१ Digitalis संप्रति हि एतस्योत्पत्तिः काश्मीरे लैन्सिडाऊन पर्वतादौ च भवति । २ Paininthe side ३ Mustard plaster

विंशति मिनटकालं स्थापनीयस्तत स्तदपनीय तत्र नवनीत-लेपो राजिकाज्वालानिवृत्तये कार्यः। प्रबलवमननिवृत्तये ऽप्यामाशयद्वारे ऽयं प्रयुज्यते।

(ग) पार्श्व शूले—इन्द्रायणफलस्वेदःसद्यःफलदः, एतत्फलरसस्य पञ्च-षड्‌विन्दुमात्रया आभ्यन्तरप्रयोगे कफ स्तनुतामापद्यते कोष्ठशुद्धि श्च भवति। उरस्तोये पार्श्व शूलोक्ता योगा श्चात्रानुयोज्याः।

## श्वासे ( श्वासप्रश्वासयोः क्लेशे )

यदा च श्वसनके द्रुतश्वासो हस्ताङ्गुल्यग्रप्रान्ता ओष्ठौ च पक्क-जाम्ववफलवर्णौ स्तः नाड़ीचातिद्रुता दुर्वला च तत्र घण्टाद्वयं त्रयं वा मर्य्यादीकृत्य "कनकासवस्य" २० विन्दुमात्रया केवलस्य द्राक्षारिष्टेन तोलकमानेन, श्वासचिन्तामणिना द्विरक्तिकामानेन, वसन्तकुसुमाकरेण वा प्रयोगः कार्यः। दशमूलारिष्टमृगमदासवयो र्वा। यत्र चोक्तौषधप्रयोगे ऽपि द्रुतश्वासः क्लेशदः, श्वाससंख्या च प्रतिमिनटं ५०त्तो ऽधिका नाड़ीसंख्या च १४० त्तो ऽधिका हस्त-पदादि ओष्ठौ च नीलवर्णौ जिह्वा शुष्का कण्टकिता, अशुभलक्षण-मिदम्। यथोक्तव्यवस्थायौषधप्रयोगे प्रतिशतं नवतिसंख्याका रोगिण आरोग्यं लभन्ते। अत्र कस्तूरी द्विरक्तिका मकरध्वजः, अर्धरक्तिको द्वयो रेका मात्रा, क्रमेण देया। विष्णुपदामृतस्याऽघ्राणेन १, दूरीभवति द्रुतश्वासः, तच्च प्रतिघण्टं पञ्चविंशति-मिनटमेव देयम्। वृहत्कस्तूरीभैरवो ऽपि पर्णपत्ररसेन देयः।

---

१ Inhalation of oxygen.

## श्वासक्लेशस्य द्वौ हेतू ।

प्रथमस्तावच्छ्वसनके फुस्फुसस्यैकान्ततः संहती भावा त्तत्र वातः प्रवेशं न लभते । फुस्फुसस्य चैतादृशावस्थायां हृदयाद्रक्त-विक्षेप १, व्यामोहो भवति ।

अतो नाड़ी अतिक्षीणा दुर्बला द्रुता च भवति । फुस्फुसे वायु-सञ्चारस्याभावान्महाश्वासः, तमेनं हृद्विकारजं श्वास माचक्षते २ द्वितीये-रक्तं विषाक्तं सत् मस्तिष्कं विकरोति ततो महाश्वासः । वातप्रधानो ऽयं वातचिकित्सयैव निवर्तते ।

विशेषश्चानयोः परस्परम्—हृद्विकारजश्वासे मुखमोष्ठौ हस्त-पदस्य चाङ्गुलयो हस्तौ पादौ च नीलवर्णौ ३ भवतः । वातप्रधाने, एतल्लक्षणं न भवति । द्वयो श्चिकित्सा पि पृथगेव । हृद्विकारजे श्वासे ।

भास्वन्मूलं जीरकव्यौषभार्गी, व्याघ्रीशुण्ठीपौष्करं गोजलेन, सिद्धं सद्यः शीतगात्रार्त्तिमोहश्वासश्लेष्मोद्रेककासान्निहन्ति । अर्क-मूलं हि प्रवृद्धां हृदयगतिं स्वावस्थां प्रापयति ।

विषतिन्दुकारिष्टो विष्णुपदामृताऽभ्राणं वसन्तकुसुमाकरमक-रध्वजादयो हृद्या रसाः प्रयुज्यन्ते सुरा च ।

---

१ Circulation परिवृत्ति स्तु चक्रवत्—
व्यानेन रसधातु र्हि विक्षेपोचितकर्मणा युगपत्सर्वतो ऽजस्रं देहे विक्षिप्यते सदा । च० चि० अ० १६ श्लो० ३३

२ Cardiac dyspnoea ३ Cyanosis

## श्वसनके कदा घण्टावीणा प्रयोग उचितः ।

१—प्रथमावस्थायां त्रिचतुर्दिनाभ्यन्तरे—यदि नाड़ी द्रुतादुर्वला वा प्रतीयेत ।

२—यदि वा हृदयस्य रक्तपरिभ्रमणस्य च दुर्बलतया प्रचुरो रक्त-युतः कफो बहिरायाति ।

३—यद्वा मद्यपिनः स्वेदसन्ततिः श्वसनके तदा सुरया, अन्यैश्च रसायनैः सह घण्टावीणा प्रयोज्या ।

## श्वसनके प्रलापः

श्वसनके प्रायो ऽतिज्वरवेगज एव दृश्यते प्रलापः । अतो येन केना प्युपायेन ज्वरे मृदुतां नीते प्रलापः स्वयमेवोपशाम्यति । महा-तिक्तघृत दशवर्षपुराणघृत शतधौत सहस्रधौत घृतस्य शिरस्यविरतं लेपात्प्रलापः शाम्यति । सतगरवरतिक्ता—अयं योगः सुपरीक्षितः प्रलापे ( भा० प्र० सं० ज्व० अ० ) यदा मस्तिष्कोत्तेजनया भवति प्रलाप स्तदा कस्तूरी १॥ र० मकरध्वजोऽर्ध रत्तिरित्येकामात्रा घण्टाचतुष्टयं मर्य्यादीकृत्य मधुना देया । उन्मत्तरसो वा २ रत्ति-मात्रया । सुरां मृतसंजीविनीसुरां वा ऽत्र प्रशंसन्ति । यत्र सुरा प्रयोगे सुनिद्रा प्रशान्त श्च रोगी तत्र ज्ञेयमुपकरोति सुरा । यत्र च प्रलापवृद्धिररतिश्च तत्र न योज्या । मात्रा च सुराया अर्धतोलकमिता, इत्थमहोरात्रं तोलकचतुष्टयं दातुं शक्यते । अनिद्रायाम्—दशरक्तिकामात्रया सर्पगन्धामूलचूर्णं जलेन गुलावार्केण वा रात्रौ योज्यम् । निद्रां जनयति प्रलापं च हन्ति ।

न च रोगिगृहे कोलाहलः स्यात्, सेवकभिन्नस्य तत्र प्रवेशनिषेध श्च कार्यः ।

## कासः ।

शृंग्यादिचूर्णं, कट्फलादिचूर्णं मात्रया, अष्टाङ्गावलेहं तु विशेषेण प्रशंसन्ति । अन्यद्द्वैवं विधम् । यत्र वातः प्रबलः शुष्ककासः बहुकालकसनान्निर्यासवद्गाढ़ःकफो निरेति, कसनक्लेशादेव निद्रानाशः क्लान्तश्च भवति रोगी, तत्र विभीतकत्वक् तत्पुटपाको वा एलादिचूर्णं (च० क्षतक्षीण चि०) तालीसादिचूर्णम् । सद्यः फलदा एते कफतनूकारणाय देया ।

आर्द्रकस्वरसोपेतं सैन्धवं कटुकत्रय माकण्ठाद्धारयेदास्ये निष्ठीवेच्च पुनः पुनः तेनास्य तालुकोष्ठांशमन्यापार्श्व शिरोगलात् लीनो ऽप्याकृष्यते श्लेष्मा लाघवं चास्य जायते । इति कवलग्रहं सकृद् द्विस्त्रिश्चतुः कुर्यात ।

पुटपक्वस्य नारङ्गफलस्य रसः कफ निरासाय पुनः पुनर्देयः पञ्चदशभि र्मिनटैः रक्तं तर्पयति वर्धयति च सद्यस्तर्पणोऽयं मूर्च्छायामपि विशेषतया युज्यते । पुटपक्वेक्षुरसो ऽपि कफनिःसारकः तर्पण श्च । यत्रैतैरुपायै र्न ह्रसति कासः तदा गलदेशे क्षतशङ्का ततो गलपरीक्षणं सति क्षते—बब्बूलत्वक्क्वाथस्य गण्डूष स्तत्सारस्य वा चूषणं खादिरसारस्य वा नवनीतेन लेपः ।

१ Empyema.

एते चोपद्रवा दृश्यन्ते श्वसनके-उरस्तोयः, फुम्फुसावरणे विद्रधिः फुस्फुसकोथः १ हृदन्तस्त्वग्दाहः, कामला, बालानां कर्णपाकः, स्त्रीणां गर्भपातः।

श्वसनके प्रथमत एव सुराया २ मृतसञ्जीविनीसुराया वा प्रयोगे भवन्ति केचन उपसर्गाः। अत स्तत्प्रयोग समयो ऽभिधीयते।

१—यत्र नाड़ीद्रुता क्षीणा अनियता ( कदाचित्पूर्णा कदाचिद-पूर्णा ) स्थित्वा स्थित्वा व्रजति।

२—यदि च महाश्वासः ( अतिद्रुतः श्वासः )

३—यत्र चौष्ठौ, अङ्गुल्यग्रप्रान्ता श्च नीलवर्णोपक्रमा स्युः।

४—यत्र वा प्रलापः।

५—यत्र च जिह्वा हस्तपदं कम्पते।

६—यत्र प्रचुरस्वेदोद्गमे जाते ऽपि न ह्रसति ज्वरः।

एतेषु सुराप्रयोगो विशिष्टमुपकरोति। यत्र च मद्यपस्य श्वसनकः तत्र प्रथमत एव सुरा देया। श्ववसनके यदा सहसा ज्वरविसर्गा-रम्भःस्ततः प्रभृत्येव सुराप्रयोगो विधेयः। सहसा ज्वरविसर्गे च प्रचुरकफनिष्क्रमः। तत्र भार्ग्यादि क्वाथः, चन्द्रामृतरसो वा देयः। विषतिन्दुकारिष्टो ३, विशेषेणात्रपूजित श्चत्वारिंशद्बिन्दुमात्रया।

## श्वसनके मृत्योः प्रधानं कारणं हृत्सादः।

तत्र शृगालविन्नारिष्टपार्थारिष्टविषतिन्दुकारिष्टादयो मकरध्वज-वसन्तकुसुमाकरादयो यथावस्थं प्रयोज्याः।

---

१ Gangrene. २ Brandy. ३ महामारी पुस्तकोक्तः।

## आरोग्योपक्रमावस्था ।

अस्यां त्रिंशद्विन्दुमात्रया भोजनात्परं चतुः कृत्वः सुरा तोलकमात्रया द्राक्षारिष्ट, दशमूलारिष्टौ वा विधेयौ ।

श्वसनकात्त्वरितमारोग्यं जायते, षष्ठ नवम दिवसयो र्मध्ये सहसा ज्वरविसर्गस्ततः पञ्चभ्यः षड्भ्यो वा दिवसै रोगी सर्वत आरोग्यं लभते । कदाचिदित्थमपि दृश्यते, यत्र सहसा दशमे द्वादशे वा दिने ज्वरस्य न विसर्गः किन्तु अनुक्रमेण विसर्गः[१], स च विंशद्भि द्वाविंशद्भि र्वा दिनै र्भवति ।

अत्रापि सन्निपातोक्ता हृद्या वल्या च चिकित्सा विधेया । द्राक्षारिष्टमकरध्वजयोः प्रत्यहं चतुः प्रयोगः । यत्र च पृष्ठदेशे संहतध्वनिः श्रूयेत तत्र राजिकोपनाहः करणीयः । निर्गुण्डीपत्रै र्वा स्वेदः ।

## श्वसनकनिर्णयः ।

कैः कै रोगैः सह भवति भ्रमः श्वसनकस्य । आन्त्रिकज्वरस्य प्रथमावस्थया सह—आन्त्रिके हि भवत्याध्मानं न तच्छ्वसनके, आन्त्रिके च श्वासस्य नाड़िकाया श्चानुपातव्यतिक्रमो न भवति । आन्त्रिकस्य भोगकाल ४–५ सप्ताहं श्वसनकस्य १०–१२ दिनम् । श्वसनके पार्श्वशूलं भवति, आन्त्रिके न तादृशी पार्श्ववेदना ।

---

१ Lisis.

शीतला १, याः प्रथमावस्थया सह—शीतलायां त्रिभिः श्चतुर्भि र्वा दिवसै र्गात्रे गुटिकाः २, निर्गच्छन्ति कटिशूलं च तीव्रमिति, आन्त्रिके तादृशगुटिकोत्पत्तिः कटि शूलं च न भवति ।

सजलोरस्तोयादस्य विशेष उरस्तोयव्याख्याने द्रष्टव्यः ।

## पथ्यम् ।

ज्वरावस्थायां दुग्धं, सागुः, मांसार्कः, यवमण्ड इत्यादि, आरोग्यावस्थायां संसर्जनक्रमेण लघु पथ्यं देयम् । इति श्वसनकः ।

लघुश्वासनाड़ीप्रदाहः ३ । प्रागभिहितमत्र श्वसनकस्येव समस्तफुस्फुसस्य प्रदाहो न भवति । किन्तु तस्य कस्यचिदंशस्य, प्रायो बालकानामयं भवति, कन्यकाना ञ्च । अस्योत्पत्तिः कासान्मसूरिकातः ४ उत्कटवातकासात् ५ प्रतिश्यायज्वरात ६ रोहिणीभ्यः ७ । हृद्रोगात्, श्वासपथगादन्नादेः । अयं क्वचिदेव मूलभूतः प्रायोऽन्यरोगोपसर्गरूप एव क्रमेण वर्धते, प्रथमं कासस्य सर्वाणि लक्षणानि प्रकाशन्ते । अत्र श्वसनकस्येव सहसा ज्वरविसर्गो न भवति । कदाचिच्च दशभि र्द्वादशभि र्वा दिवसै र्भवति साङ्घातिकः क्वापि त्रिभि श्चतुर्भिर्वा सप्ताहै रपगच्छति । मृतिश्चात्र श्वसनकापेक्षया अत्यधिका ।

---

१ Small Pox. २ Erruption.

३ Catarrhl lobularor broncho-Pneumonia. ४ Measles.

५ Whooping-cough ६ Influenza. ७ Diphtheria.

## शारीरम् ।

प्रथमं लघ्व्यः श्वासनाड्यः प्रदह्यन्ते, ततः फुस्फुसपुञ्जानि संसरति प्रदाहः । अत एवायं "खण्डश्वसनक" इत्याख्यायते । इत्थं कतिचनपुञ्जानाक्रम्य तस्य कस्यचिदंशस्य प्रदाहो भवति । एव मुभावपि तौ ( फुस्फुसौ ) प्रदाहो व्याप्तुं शक्नोति । ततो भवति तस्य निष्क्रियता १ ।

## लघुश्वासनाडीप्रदाहकारणम् ।

कासादेतस्योत्पत्तिरतः समस्तानि कासलक्षणान्यत्र प्रकाशन्ते ।

१—कासः—कसतः श्वासरोधो जायते ।

२—महाश्वासः—प्रतिमिनटं ८०-९० यावच्छ्वाससंख्या दृश्यते ।

३—कफे रक्तं न भवति । कफश्च कास इव सफेनो ऽत्र भवति ।

४—ज्वरः-प्रथमं १०१-१०२ तो नाधिकस्तत उत्तरोत्तरं १०४-१०५ यावद्वर्धते । अस्य सहसा विसर्गो न भवति,किन्तु शनैः शनैः ।

५—यदा ज्वरस्य श्वासस्य चाधिक्यं, तदा नाड़ी द्रुता क्षीणा प्रतिमिनटं १६०--१८० यावद्भवति ।

६—अन्त्रप्रदाहः पिपासाधिक्यं शुष्का कण्टकिता ईषद्रक्ताभा जिह्वा, अतिसारश्च दृश्यते ।

७—प्रलापः, अरतिः, प्रमीलकः ( अर्धज्ञानम् ) एवं मूर्च्छाया अपि सम्भवः । श्वसनक इवात्र रोगी त्वरितं स्वस्थो न भवति, समयमपेक्षते सम्पूर्णारोग्ये ।

---

१ Collapse.

## श्वासनाड़ीप्रदाहस्याभ्यन्तरचिह्नानि ।

कास इवात्रा ऽनेकविधागन्तुकार्द्रशब्दाः श्रूयन्ते । यदि फुस्फुसस्य साधारणांशस्य प्रदाहः, तत्र ताडने श्रावणे वा न को ऽपि विशेषशब्दो लभ्यते । यदा अंशविशेषस्य प्रदाहः तदा ताडने सीमितो Patchy, संहतध्वनिः प्राप्यते, मृदुःकेशमर्दनवदार्द्रध्वनिः Fine subcrepitant Rales, श्रूयते, श्वसनक इवात्र सर्वाणि लक्षणानि स्पष्टतया न लभ्यन्ते ।

## चिकित्सा ।

यथा रोगी सुखेन कफं त्यक्तुं शक्नोति तादृशी व्यवस्था कर्त्तव्या यथा–भार्ग्यादिकाथो १, घण्टात्रयेण चन्द्रामृतरसेन देयः । एव मेलादिचूर्ण, तालीशादिचूर्ण, सितोपलादिचूर्णानि यथायथं देयानि मधुना, द्राक्षारिष्टदशमूलारिष्टौ तोलकमात्रया दुग्धानुपानेन दत्तौ कफं तनू कुरुतः । स्वेदोऽप्यत्र विशेषहितः । स च द्विधा–मुखेन बाष्पस्वेदः । बहिरुरसि पृष्ठे च सर्वतो ऽतसीखलेनोपनाहो, घण्टाचतुष्टयान्तरं कृत्वा देयः । कवलग्रह आर्द्रकस्य२, कफप्रकृतीनां महाफलः ।

पञ्चसप्तवर्षदेशीयबालानां कृते—मकरध्वजः ¼ र० वंशलोचनं १ र० इत्येकामात्रा—आरामपुष्प ( बनप्सा ) काथेन मधुमधुरेण देया ।

---

१ भार्गी कण्टकारीसैन्धवैः ।

२ आर्द्रकस्वरसोपेतं सैन्धवं कटुकत्रयम् ।

निर्गुण्डीपत्रमरीचक्काथेन सितादुग्धयुतेन, एक एव श्वासचिन्तामणि१ रारोगावसानं प्रयुक्तः सर्वानुपद्रवान्निवारयति महाफलः। पर्णवृन्तपिप्पलीमूलयोः प्रत्येकं तोलकयोः काथो लक्ष्मी विलासरक्तिकामात्रया वा। शृंग्यादिचूर्ण मुष्णजलेन, सुरा मृतसञ्जीविनीसुरा वा मात्रया प्रयोज्या। विशेषोपकारकत्वात्स्वेदोऽपि बालानां देय एव।

जीर्णे चास्मिन्रोगे वृद्धानां दशमूल-च्यवनप्राश-मकरध्वजाभ्रताम्रयोगा स्तै स्तैश्चूर्णैः क्काथै श्च देयाः प्रत्यहं त्रिश्चतु र्वा।

बालानां यूनां च कर्पूरयुतेन सैन्धवादितैलेन सरलतैलेन वा उरसि पृष्ठे पार्श्वयो श्च मर्दनं त्रिस्ततः, उष्णीकृतै स्तूलवस्त्रै रूर्णावस्त्रै र्वा वेष्टनं परितः। स्वेदेनार्द्रतायां वस्त्राणां तत्क्षणात्परिवर्त्तनम्। रोगस्य प्रथमावस्थायां पृष्ठे फुस्फुसनिम्नदेशे वा राजिकोपनाहयोगो विशिष्टमुपकरोति।

## ज्वरकासयो श्चिकित्सा।

ज्वरस्यप्रथमावस्थायां कफकेतुरसो मधुना पर्णपत्ररसेन वासास्वरसेन वा देयः, श्लेष्मशैलेन्द्रकफचिन्तामण्यादयो वा तिसृभि र्घण्टाभिः प्रयोज्या--तुलसीपत्ररसेन—बालानां पर्णवृन्तक्काथो२, देयः केवलः कफतनूकरणाय विशेषतो दुग्धपायिनामतीवोपकारी। आचूषणमत्र लवङ्गादिवटिकाया यवक्षारादिवटिकाया श्च कफतनूकरणाय तन्निःसारणाय च।

---

१ द्विकर्ष लौहचूर्णस्येत्यादिः। २ पर्णवृन्तपिप्पलीमूलयोः।

बालानां विट्सङ्गे—पीतमूलीसत्वं २ र० ( उसारे रेवन्द ) सौभाग्यं २ र० द्वयोरेकामात्रा-घण्टाचतुष्टयेन रेचयति । दश पञ्च-दशविन्दुमात्रया वृहत्सैन्धवादितैलं मेरण्डतैलं वा दुग्धेन देयम् । अतीसारे—सिद्धप्राणेश्वर, लवङ्गचतुसमादयः प्रयोज्या । श्वासे—सोमचूर्णं पञ्चरक्तिमितमुष्णजलेन नातिचिराच्छ्वासवेग मपहन्ति नातःपरतरं किमपि श्वासे । तिन्दुकारिष्टो १. ऽत्र विंशतिविन्दु-मात्रया श्वासकासौ हन्ति हृद्य श्च ।

वाष्यस्वेदश्च शोथघ्नर्वातघ्नै र्दशमूलादिभि र्देयो महाश्वास-नाशाय महाफल स्तथाहि—

वातघ्नद्रव्यपूर्णन्तु सजलं पात्रकं लघु ।
कोकिलाग्नौ तथा धार्य्यं वाष्पं तस्य यथा सुखे ॥१॥
रोगिणः श्वसनेनाथ गच्छेदन्तः सुखेन हि ॥

प्रलापे—पूर्वोक्तायोगाः । बालानां—सुरा १० विन्दुमाना, उष्ण जलेनार्धतोलकेन यूनामुन्मत्तरसो नस्येन देयो, रक्तिका-मात्रयाभ्यन्तरं च प्रयुज्यताम् । सर्पगन्धामूलचूर्णमपि दश-रक्तिकामात्रया सुनिद्रां जनयति प्रलाप श्चापहन्ति ।

## पथ्यम् ।

दुग्धं सागुः, अतीसारे च मोरटो देयः । यत्र च श्वासक्लेशाद् गिलितुमसमर्थो रोगी—तत्र गुदमार्गेण भोजनीयः । रोगान्त-

---

१ अस्मत्कृतमहामारीनिबन्धात् ।

दौर्बल्ये च सावधानता। बालानां द्राक्षासवो भोजनात्परं जलेन देयः। अभ्रशिलाजतु कुपीलुयोगा श्च न विस्मर्त्तव्याः।

संक्षिप्ताऽत्र चिकित्सा तु विट्सङ्गे ऽल्पं विरेचनम्।
ज्वरकासप्रलापानां श्वासस्य च कृते बुधैः ॥ १ ॥
निर्गुण्डीपत्रजः क्वाथो मरीचैश्च सितायुतः।
देयो घण्टात्रयादूर्ध्वं सदुग्धो ऽत्र विशेषतः ॥ २ ॥
श्वासचिन्तामणे र्योगः कर्त्तव्यश्च द्विरक्तितः।
श्वासाधिक्ये तत्र क्वाथे दीयतां कनकासवः ॥ ३ ॥
पञ्चविंशद्विन्दुभि स्तु कचिच्छ्वासकुठारकः।
ब्राह्मीतैलस्य शीर्षे हि प्रलापो मर्दनाद्व्रजेत् ॥ ४ ॥
प्राणवायोः समाघ्राणं वाष्पस्वेदो मुखेन च ॥

## अन्यरोगोपसर्गः श्वसनकः।

अयमन्यरोगेषूपसर्गरूपेण दृश्यते। यथाऽन्त्रिकादौ चिकित्सा च श्वसनकस्येव।

इति लघुश्वासनाड़ीप्रदाहः।

---

## कांस्यक्रोडः Pleurisy or Pleuritis·

फुस्फुसावरण 'कला' प्रदाहःकांस्यक्रोड इत्युच्यते, स द्विविधो नूतनः प्रत्नश्च, पुनरपि द्विविधः—शुष्कः सजल श्च। सजलोऽपि बहुजलाल्पजलभेदं भजते चिकित्सासौकर्यार्थम्। प्रधानाप्रधान-भेदेन भूयोऽपि द्विविधः। प्रधानः Primary स्वतन्त्रः शीतेनोद्भवति।

अप्रधान Secondary उपसर्गभूतः, प्रायेण निम्नोद्दिष्टरोगेषु दृश्यते—उरोघाते, व्रणे, मसूरिकायां, आमवाते, हृदावरणकला-प्रदाहे, प्रत्नवृक्करोगे, श्वसनके, लघुश्वासनालीप्रदाहे, क्षयादि१, फुफ्फुसरोगेषु, अन्येषाँ च प्रत्नाऽसाध्यरोगाणामवसाने।

## लक्षणानि।

वातकफप्रधानश्चायं, तत्र-वातेन पार्श्वे प्रचुरा वेदना, सा च श्वसने, कसने, हिक्कने, हस्तेन पार्श्वपीडनेऽपि प्रवर्धते, न च तेन पार्श्वेन शयितुं शक्नोति, ज्वरश्च द्व्युत्तरं त्र्युत्तरं वा शतं तापमा-नयन्त्रेण भवति नातोऽधिकः। अत्र–चरकः—

तथान्यैः कर्मभिः क्रूरैर्भृशमभ्याहतस्य च।
उरो विरुज्यते तस्य भिद्यतेऽथ विदह्यते ६,

---

१ कलाप्रदाहे स्रवति सति प्रतिशतमशीतिसंख्याका रोगिणः क्षयजा एव भवन्ति, अज्ञातकारणाः।

अपीड्येते ततः पार्श्वे शुष्यत्यङ्गं प्रवेपते।
क्रमाद्वीर्यं बलं वर्णो रुचिरग्निश्च हीयते ७।
ज्वरो व्यथा मनोदैन्यम्।

कासो भवति न वा, वक्षसः परीक्षया प्रबलो घर्षणध्वनिः Friction Sound श्रूयते, हस्तपरामर्शनेन चानुभूयते शुष्के, ध्वनिश्चायं फुप्फुसकलयोरुभयोः परस्परं घर्षणजः। कलयोर्जल-सञ्चयात्प्रागेवास्य शुष्क इति नाम। यदा चैतयो र्जलसञ्चयो भवति तदा सजल इति। Pleuritice Effusion कथ्यते।

## सजललक्षणानि।

प्रतिघाते संहतध्वनिः, सञ्चितं जलं फुप्फुसं हृदयं च यथाक्रमं वामदक्षिणयोः पार्श्वयोः, यकृत्प्लीहानौ—चाधोऽपसारयति स्वस्थानतः, पीडयति च बृहद्धमनीम्, पर्शुकाप्रदेशस्तदन्तरालं चोच्छूनं दृश्यते, न च हृच्छब्दः Apex beak यथास्थानेऽनुभूयते, जलोत्पीडनेन हृदयस्य स्थानतोपसृतवात्, महाश्वासः,(श्वास-प्रश्वासयोर्महान् क्लेशो भवति) जलसंभृतपार्श्वेन शेते, उत्तानो वा, नीरुक् फुप्फुसं च श्वसनकार्यंकरोत्यतस्तस्मिन्नेव पार्श्वे सञ्चलनं सविशेषं दृश्यते स्वल्पञ्च च सरुजि, वक्षःपरीक्षया वाक्-प्रतिध्वनि१, Vocal resonance स्वरोत्कम्पन२, Vocal

---

१ एकादिदशसंख्यां यावत्परिगणने, वाक्योच्चारणे वा श्रवण-यन्त्रेण वक्षसि य एकविधः शब्दः श्रूयते स वाक्प्रतिध्वनिर्नाम॥

२ स्वरयन्त्रपरिचालनजनितवक्षः कम्पनं नाम 'स्वरोत्कम्पनम्'।

fremitus कोषीयध्वनीनां१, Vecular murmur न कोऽपि श्रूयते । किञ्च यस्मिन् पार्श्वे जलसञ्चयस्तत्र श्वासप्रश्वासयोर्मन्दता स्वस्थपार्श्वापेक्षया स्फीतता च दृश्यते । प्लीहा यकृद्वा जलस्य पीडनेनाधोयात इति प्रागभिहितम् ।

## कांस्यक्रोडस्य चिकित्सा ।

यावदस्मिन् जलं जलरसो वा न सञ्चीयते तावदेष शुष्कः कांस्यक्रोड इत्यप्युक्तम् । अस्या मवस्थायामतीव पार्श्ववेदना भवत्यतस्तन्निवृत्यर्थं वेदनास्थाने चतस्रो जलौकाः पातनीया स्तदनुपदं च प्रतिसप्तघटिक ( ३ घण्टा ) व्यवधानेनातसीखलेनोपनाहस्वेदः चतुःपञ्चकृत्वो वा विधेयः । ऊर्णावस्त्रै ( फलालेन ) श्च पार्श्वाविष्टनं सर्वतः कर्तव्यम् । किञ्च—

"तैलेन नारायणनामकेन, जतूनतार्पीनभवेन वाऽपि ।
अभ्यज्य पार्श्वं लवणैः सुखोष्णैः संस्वेदयेद्दारुणपर्शुकार्तौ ।
वातामतार्पीनजतूनसञ्ज्ञि, ससार्षपं वै विलसाख्यतैलम् ।
करोत्युरः शूलममूलमुग्रमभ्यञ्जनादेव विभाव्य दृष्टम् ।
पट्टुं सगोधूमतुषंकटुष्णी कुर्वीत युक्त्या तवकेऽग्नितप्ते ।
तत्पोटलीं साधुविधाय वस्त्रे,त्वरं तया स्वेदयतु प्रयत्नात् ।
लेपोऽप्युरः शूलहरः कुपीलोः, दृष्टस्तथा शम्बरशृङ्गजातः ।
ऐलेयशुण्ठीविषरूमगुन्द्रैः, सहिङ्गुकैस्त्वत्र महाप्रभावः ।"

सिद्धभेषजमञ्जूषा ।

---

१ स्वस्थफुप्फुसस्य शब्दः कोषीयध्वनि र्नाम ॥

स्यादेतत्। प्रथमदिने रात्रौ शयनवेलायां सार्धद्विरक्तिकामानं रसचूर्णम्, इन्द्रायणमूलं त्रिमाषकम्, आर्द्रकं षण्मासकमेतयोः क्वाथेन दद्यात्। अपरेद्युः प्रातश्चूर्णमिदं त्रिमाषमितया मात्रया देयं येन त्रिश्चतुर्वा कोष्ठशुद्धिः स्यात। (हरीतकी १ सनामुकी (सनाय) ४ शुण्ठी १ मधुयष्टिः१ एला १ त्वक् १) अतः परमपि नियमेन प्रत्यहमप्रमादेन कोष्ठशुद्धि र्विधेया;अन्यद्वा एवं विधं विरेचनं देयम्। श्वेतपुनर्नवा (अभावे रक्ता) निर्गुण्डीकृतः क्वाथः पुनः पुनर्मृगश्रृङ्गभस्मना ४ रक्तिकामितेन दशघटिकां मर्यादीकृत्य देयः।

दशमूली रसः पीतः कणाढ्यः कफवातजे।
ज्वरेऽविपाकेऽनिद्रायां पार्श्वरुक् श्वासकासके।
वर्षाभूस्वरसं वापि, यवक्षारसमायुतम्।
पिवेन्नित्य मुरस्तोयी, सायं प्रातरतन्द्रितः॥
श्वयथौ मूत्रकृच्छ्रे च, कासे श्वासे हृदामये।
भेषजं गदितं यद्यत्तत्तदत्र प्रयोजयेत।

अभ्रकभस्मयोगः१, शिलाजतुयोगो वा ऽत्र विशिष्टं फलति। नारायणतैलेनाभ्यज्य पुनर्नवानिर्गुण्ड्योरुपनाहः त्रिश्चतु र्वा विधेयः, अन्यद्वा वेदनास्थापनं सिद्धविहितं पुनःपुनः कार्यम्। वेदनाशान्तावप्येककालं द्विकालं वा लेपसेकादिकं विधेयमेव। अथात्रापि क्वचिदङ्गुलिमितेऽपि प्रदेशे घर्षणशब्द श्चेच्छ्रूयेत तदा तदुपरि राजिकोपनाहः कर्तव्यः त्रिश्चतुर्वा। एतेनाल्पेनैव कालेनो-

१ धात्रीद्राक्षाविदारीणां यष्ट्याह्वं गोक्षुरं तथा। अयं क्वाथः शुद्धं सूतं समं गन्धं लौहमित्युक्ततारकेश्वरेण सह पूयमेहे, इवात्रापि उपकरोति

पशमो भवति शुष्ककांस्यक्रोडस्य । पार्श्वशूलोक्ता चिकित्सा चात्र कार्या ।

## स्वल्पजलसञ्चये चिकित्सा ।

शुष्के या चिकित्साभिहिता सैवात्रातिदिश्यते विशेषतः कफघ्नी। यथाः—प्रथमदिने रात्रौ रसचूर्णं पूर्वोक्तक्वाथेन, अपरेऽह्नि प्रातः हरीतक्यादिचूर्णम्, जलौकापातनं, अतसीखलेनोपनाहः, पार्श्वयोरूर्णावस्त्रेण परित आवेष्टनमिति। कासशान्त्यै विभीतकपुटपाकः, एलादिचूर्णम् (चरकक्षतक्षीणचिकित्सोक्तम्) द्राक्षारिष्टो, मधुना मयूरपुच्छभस्म वा सर्वोपद्रवेषु हितम्, आचूषणं वा लवङ्गादिवटिकायाः, ज्वरादिनिवृत्त्यर्थं श्वासचिन्तामणिं कफचिन्तामणिं वा यवक्षारयुतेन पुनर्नवानिर्गुण्डीक्वाथेन१, दशमूलक्वाथेन वा अहोरात्रं चतु र्दद्यात् । हृद्यमेकादशाङ्गाभ्रं२ वेदनानिवृत्यर्थं ज्वरह्रासाय च देयं । अहिफेनघटितत्वादस्य प्रयोगस्य कोष्ठशुद्धौ भिषक् विशेषावहितः स्यात् । वेदनायाः कृते धत्तूराहिफेनवल्कलोष्णक्वाथे, ऊर्णावस्त्र (फ्लेनल) मार्द्रीकृत्य निष्पीड्य च तेन प्रत्यहं त्रिरर्धघटिकं सरुक्पार्श्वं स्वेदनीयम् । इत्युक्तदिशा-

---

१ पुनर्नवानिर्गुण्डीक्वाथः शोथघ्नत्वात्पुनर्नवाया मूत्रलत्वादतीवोपकारकरोऽन्यत्राप्युदरादिषु जलसञ्चये शोथे च केवलैव पुनर्नवा क्वाथरूपेण सेव्यमाना त्रिगुणं मूत्रपरिमाणं वर्धयत्यहोरात्रेण हृद्याचानुभूतोऽस्माकम् । निर्गुण्ड्यपि शोथघ्नी ।

२ रसहृदयोक्ते दशाङ्गाभ्र एकभागाऽहिफेनयोगा देकादशाङ्गाभ्रं भवति

चिकित्सया स्वल्पं जलं नातिचिराद्विशुष्यति । समयेऽस्मिन् तृष्णा चेद्बाधेत तदुपशमाय यावदेवोपयुक्तं तावदेव जलं दद्यान्नाधिकम् ।

यत्ने तु १मकरध्वजमुक्तालौहसुवर्णाभ्राम्बरकस्तूरीशिलाजतूनां योग एकशो द्विशः सर्वशो वा विशिष्टं फलतिः, प्रवालपञ्चामृतामृतप्राशघृतादयः क्षयचिकित्सा चानुसर्तव्या । मल्लसिन्दूर—श्वासकुठार समीरपन्नगरसानवस्थाभेदेन—सितोपलादिचूर्णं ञ्च प्रशंसन्ति ।

## उरस्यायां प्रचुरजलसञ्चयपरीक्षा ।

१ यस्मिन्पार्श्वे जलसञ्चयस्तदितरापेक्षया समायतनेन वर्धितं भवति ।

२ स्वस्थपार्श्वापेक्षया अस्वस्थस्य मानं मानरज्वा ( Tape ) मापितं सद्वर्धितं भवति ।

३ क्रियाहीनत्वादस्वस्थपार्श्वस्य सञ्चलनं न दृश्यते, तत्र श्वासप्रश्वासौ च न भवतोऽल्पौ वा ।

४ अभिघाते च ( Percussion ) पूर्णः संहतध्वनिरनुभूयते ।

५ स्वरोत्कम्पनं ( Vocal fremitus ) ह्रासमेति ।

६ हृदयमेकतो ऽपसरति ।

७ वामदक्षिणयोः पार्श्वयोर्जलसञ्चये यथासंख्यं प्लीहा यकृद्वाऽधोऽपसरति ।

---

१ मुक्तासुवर्णयोगः सर्वमान्यो बहुकालं सेवितः क्षयजे फलाय कल्पते ।

८ ईषदपि पार्श्वपरिवर्तने महाश्वासो मनः ( हृत ) कम्पश्च भवति ।

९ नाड़ी चाव्यवस्थिता ( Irregular )

१० रक्तविक्षेपस्य श्वासस्य चावरोधान्मुखं चक्षुषी हस्तौ पादौ च नीलवर्णौ भवतः ।

## प्रचुरजलसञ्चये चिकित्सा ।

अल्पजलसञ्चये या चिकित्सोक्ता प्रथमतः सैवात्रातिदिश्यते सर्वशः । किञ्च, गोक्षुरपुनर्नवात्रिफलाक्वाथेन – अयोरजस्त्र्यूषण-यावशूकचूर्णं निपीतमित्यस्य लौहस्य प्रयोगः कार्यः । यदि च सर्वथा सुचिकित्सया एकविंशतिदिनं यावत् जलं न ह्रसति तदा क्षणमपि विलम्बं न कृत्वा योग्यां गतेन धान्वन्तरीयेण Surgeon जलस्याचूषणं Aspirate कारयितव्यम् । यदा चैकं समस्तपार्श्वं जलेन पूरितं सुचिकित्सया अल्पमपि वा जलमात्रिसप्ताहं न ह्रास-मेति, यत्र वा जलं पूये परिणमेत, आचूषणस्य चावश्यकता नितरां प्रतीयेत तदा स्याच्च कश्चन पारदृश्वा शल्यवित् ।

Treve's operative surgery अत्र यथा शल्योद्धरणविधि-र्वर्णितः तदनुसारेण वर्त्तनीयम् ।

## अत्र मृत्यकारणम् ।

श्वासरोधेन हृत्सादेन वा मृत्युर्भवति । कांस्यक्रोडे प्रतिशतम-शीतिसंख्याका रोगिण आरोग्यं लभन्ते न चेत्क्षयनिमित्तजाः ।

## रोगान्तरात्प्रभेदः ।

### श्वसनकादस्य विशेषोऽधोनिर्दिश्यते

| श्वसनके | सजलकांस्यक्रोडे |
|---|---|
| (क) प्रबलो ज्वरः १०४—१०५ | (क) १०३ इतःपरं न वर्धते ज्वरः। |
| (ख) वाक् प्रतिध्वनिः Vocal Resonace स्वरोत्कम्पनं च Vocal Fremitus वर्धते | (ख) वाक् प्रतिध्वनिः स्वरोत्कम्पनं च न वर्धते। |
| (ग) संहतध्वनिः सम्पूर्णो नानुभूयते। | (ग) सम्पूर्णो संहतध्वनिरनुभूयते |
| (घ) नाडीश्वासगत्यनुपातयोर्व्यतिक्रमः। | (घ) नात्र नाडीश्वासगत्यनुपातयो र्व्यतिक्रमः। |
| (ङ) हृदयं फुप्फुसश्च न स्थानाच्च्यवेते। | (ङ) फुप्फुसावरणे सञ्चितं जलं हृदयं फुप्फसं च स्वस्थानाच्च्यावयति अतो हृदयशब्दो यथास्थाने न लभ्यते। |

### फुप्फुसावरणे पूयसञ्चयस्य (विद्रधेः) सजलकांस्यक्रोडस्य च विशेषः।

| फुप्फुसावरणविद्रधो Empyema | सजलकांस्यक्रोडे। |
|---|---|
| (क) अत्र ज्वरो जीर्णज्वराकृतिर्भवति यथा—प्रातः ९८-९९ सायम् १०३—१०४ | (१) नात्र ज्वरो जीर्णज्वराकृतिः प्रातःसायं समतयैव दृश्यते यथा—१०२—१०३ इतोऽधिको न वर्धते। |

| | |
|---|---|
| (२) पार्श्वशोथोऽल्पो नामितो नतो भवति । | (२) शोथोऽङ्गुलिना निपीडितो न नमति । |
| (३) विशेषेण पाण्डुता । | (३) नात्र विशेषेण पाण्डुता । |
| (४) शीतपूर्वकः सकम्पो ज्वरः । | (४) न च शीतपूर्वको ज्वरः । |
| (५) भृशं स्वेदः । | (५) नात्र स्वेदः । |
| (६) श्वेताणूनां संख्या वर्धिता भवति । | (६) नात्र श्वेताणूनां संख्या वर्धिता भवति । |

यदि च कांस्यक्रोडे सहसा मुखतः सपूयः पूतिगन्धिः कफो निःसरेत् ।

(दुष्टः श्यावः सदुर्गन्धः पीतो विग्रथितो बहुः ।
कासमानस्य च श्लेष्मा......सम्प्रवर्तते ।)

( च० चि० अ० १६ )

तदो फुप्फुसावरणे विद्रधिं जानीयात् । अत्र विद्रधौ जीर्णे सति, अङ्गुलिप्रान्ताः स्थूलतामापद्यन्ते । एतेन फुप्फुसावरणे विद्रधि र्व्याख्यातः । चिकित्सा चात्र कुशलशल्यविदा पूयाचूषणमेव कांस्यक्रोड-जलाचूषणवत, पथ्यं च दुग्धं सागुः सागुसदृशमन्यद्वा लाजमण्ड-कुलत्थयूषादि, मानमण्डोपि शोथहरत्वादुपयुक्तः । किं च—

पेयाम्वा रक्तशालीनां सिद्धां ज्वरहरीं पिवेत् ।
श्वदंष्ट्राकण्टकारीभ्यां वस्तिपार्श्वशिरोरुजि ।
पार्श्वहृद्वस्तिशूलेषु यवक्वाथेन संयुताम् ।
सर्पिः प्लीहोदरोक्तं वा । उभयार्थसाधकम् । सु० उ० अ० ४२

इति संक्षिप्योक्तम् । विस्तरस्तु आकरेभ्यो ज्ञेयः ।

## उत्कटवातकासः Whooping cough

अयमपि कृमिजो महा न्सांसर्गिको रोगः[१]। श्वासमार्गं[२] तच्छाखाश्च[३] विकरोति। कासवेगान्ते कुक्कुटरुतवद् विशेषप्रकारकः शब्दो भवति।

हेतु—संसर्गजोऽयं सामान्यतो मासद्वयत आदशवर्षवयस्कान् बालान् तदपेक्षया कन्यकांश्चाधिक्येनाक्रामति, मसूरिकान्ते च प्रायशो दृश्यते, बाल्यात्परं प्रायो न, गृहे, एकस्य बालस्य जातश्च प्रायो बालान्तरानपि सर्वान् निष्ठीवनदूषितकरप्रोच्छनादिना संसरति। ज्वरश्चात्र प्रायो न भवति। विषं चास्य निष्ठीवनतः प्रथमे सप्ताहे संसरत्यतिशयेन, ततः क्रमेण सांसर्गिकत्वं ह्रसत्या-पञ्चसप्ताहम्। शीतर्तौ भवति प्रसरोऽस्य। यावज्जीवं सकृदेवा क्रामति च।

सम्प्राप्तिः—एतद्विषस्य परिणामो भवति मस्तिष्के, ततः शनैः शनैः कासवेगः श्वासमार्गे प्रदाहः शोफश्च।

अत्रवाग्भटः—

....तत्राधो विहतोऽनिलः।
ऊर्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च संसृजन्।
शिरः स्रोतांसि सम्पूर्य ततोऽङ्गान्युत्क्षिपन्निव।

---

१ Contagiousdisease. २ Trachea. ३ Bronchi.

क्षिपन्निवाक्षिणी पृष्ठं मुरः पार्श्वे च पीडयन् ॥
प्रवर्त्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः ॥
( नि० अ० ३ श्लो० १९—२० )

प्रायस्तिस्रोऽवस्थास्य, आक्रमणाऽवेगाऽपचयभेदेन। तत्र प्रथमायां केषाञ्चन १०० तो १०२ यावद्भवति तापः, कासश्च शुष्क आसप्ताहं तिष्ठत्येषा।

द्वितीयायां कण्ठधूमायनाद्भवन्त्यनुक्रमेण कासवेगा दश पञ्चदश वैकदा। श्वासश्चोर्ध्वमेव प्रवर्तते नाधः। ततो वायुशून्यनलिकायां सहसा वायुप्रवेशस्यैव कुक्कुटध्वनिवच्छब्दो (हूप्) भवति द्वि स्त्रि श्चतुर्वा। अक्षिणी बहिरिवायातः (क्षिपन्निवाक्षिणी) सरक्तंमुखम्, वान्त्यादोषौ च। ततः शान्तो भवति प्रति वेगापाये, नातिप्रबले च रोगे सुखेन क्रीडति पूर्ववत्। घण्टा त्रयं तच्चतुष्टयं वा यथा न कोऽप्यस्य रोग इति। ततः सहसा भवति वेगः पूर्ववत्। प्रत्येककासवेगकालश्चार्धमिनटतो मिनटद्वयं यावद्भवति। ततोऽपि पूर्ववद्वेगापाये स्वस्थो भवति। कासमानस्य च जिह्वा बहिरायाति, नाडी चातिद्रुता, अनिच्छया च मलमूत्र प्रवृत्तिः। नस्त श्चक्षुर्भ्यां जलं स्रवति, अनेकशः कसनान्निर्यासवद्गाढः कठिनोऽल्पः क्वचित् सरक्तः कफो बहिरायाति वमति च बालः। वेगस्य तरतमभावेन जिह्वायां[१] चक्षुषि[२] मस्तिष्के च रक्तवाहिनोविदरणादल्पाधिको रक्त स्रावः। नश्यति च फुस्फु-

१ जिह्वायां व्रणो भवति, कासमानस्य दन्ताघातात्।

२ चक्षुषि रक्तस्य कठिनीभावा च्छयावता।

सस्य स्थितिस्थापकता, प्रसारो वा तत्सूक्ष्मकोषाणाम् । कदाचिच्छ्वासरोधान्मृत्युरपि भवति । वेगाश्चास्य प्रत्यहं पञ्च सप्त ततोऽधिका वा रात्रौ च विशेषेण, प्रबले च रोगे ऽशीतिं यावद्भवन्ति । अवस्था चैषा त्रिसप्ताहत आषट् सप्ताहं तिष्ठति । प्रत्यहं यावन्तः कासवेगा अधिका तावानेव रोगः कठिनः ।

तृतीयावस्थायां वेगसंख्या ह्रसति, सामान्यतः सार्धमासेन मासद्वयेन वा स्वस्थो भवति । क्वचिद्दीर्घकालमप्यनुवर्त्तते । षण्मासन्यूनवयसो ऽस्थिविकार१, आक्षेप, वातलक्षणप्रबलस्य च भाविफलं न शुभम् । यावद्वयोऽधिकं तावन्मङ्गलम् । रोगोपशम—काले च भवति क्षयस्य सम्भवः ।

उपद्रवाश्चः—अतिसारः, वधिरता, फुस्फुसावरणे श्वासनलिकायां च प्रदाहः, श्वसनकः, शिरसि रक्तस्रावात्पक्षवधादयः । निदाने च प्रथमदिनसप्तके भवति व्यामोहः ।

पुनस्तादृशविशिष्टकासशब्देन च भवति निर्णयो रोगस्य । मूत्रस्य वर्णं स्वच्छतरमापेक्षिकगौरवं चात्यर्थं वर्धते, इति च सर्वदा निर्णायकं लिङ्गम् ।

## चिकित्सा

नायं सामान्यो रोगः । कदाचिन्मारक*रूपेणाऽपि प्रसरति । सञ्जाते च रोगे कथं कथमप्यस्य क्रमो न निवार्य्यते । अतो रोग-

१ Rickets

* १८७७ खृष्टाब्दे इङ्गलैण्डदेशे अनेन १०३१४ जना यमालयं प्रापिताः ।

स्थानाद्बालानां शिवेषु जनपदेषु स्थानान्तरकरणम् । शीतपरिहारश्च स्नानं चोष्णजलेन, उष्णवस्त्रपरिधानं च । गृहस्य सर्वोच्चस्थानेऽन्यबालेभ्यः पृथगेकान्ते रुग्णस्य शय्या विधेया निवातातप-प्रवातातपैकदेशे । वेगापायेऽल्पाल्पतया पुनः पुन र्लघु पथ्यं दुग्धं सागु र्यवमण्डो वा । सामयिकानां फलानां च स्वरसाः प्रदेयाः । नवा कदाचित्सम्पूरणीय मुदरं वमनभीतेः । प्रत्यहं कोष्ठशुद्धिश्च ।

त्रिविधाह्यस्य चिकित्सा—१ कृमिघातिनी१, २ कफतनूकरी२ ३ अवसादकरी३ च ।

१ तत्र कृमिघातिनी—गन्धक, गुग्गुलु, विजयापत्र, मांसी, लोहवानानां घृतयुतानां धूपो रोगिगृहे शय्यासमीपे च देयः । स्वर्जिक्षारयुतै र्वा एतै र्बाष्पस्वेदः । तथाहि—ज्वलदङ्गारोपरि लघु पात्रमेकं संस्थाप्य तत्र गन्धकादिधूपं चावाप्य शय्यासमीपे तत्पात्रं तथा स्थापयेद्यथा तद्बाष्पं रोगिणः श्वासेन सहान्तर्गच्छेत । प्रत्यहं तद्गृहे गन्धकस्य धूमश्च देयः । लवङ्गादिवटी (तुल्यालवङ्गेत्यादिभिः) ना माचूषणं मन्यद्वा सिद्धविहितमेवं विधम् ।

२ कफतनूकरीः—शृंग्यादिचूर्णम्, अष्टाङ्गावलेहं वा मधुना ४र० मात्रया घण्टात्रयेण लिह्यात् । इमौ कासश्वासवमननिवारणे चमत्कारकौ । भार्ङ्ग्यादिक्वाथो वा । स्तनपायिनां शिशूनां पर्णवृन्त, पिप्पलीमूल, द्राक्षा, यष्टीमधूनां क्वाथः द्विरक्तिपिप्पली-चूर्णयुतो देयः । बालानांच वासकत्वक्, यष्टीमधु, द्राक्षा, पिप्पलीनां क्वाथो वक्षसि कफसञ्चये, आध्माने, कासे ज्वरे च महानुपकारकः

---

१ Antiseptic, २ Anticatarrhal. ३ Sedative,

कोष्ठशुद्धिकरश्च देयः। यष्टीमधुपिप्पलीलाजानां चूर्णं मधुना वमनकासनिवृत्तये भवति। प्रवले च रोगे विहायान्नं दुग्धयुतो लाजमण्डो देयः। रात्रौ च विशेषेण लघु पथ्यं देयम्। स्फटिकाचूर्णमेकहायनस्य, एकरक्तिमात्रया, द्विहायनस्य सार्धरक्तिमात्रया, पञ्चषड्हानस्य त्रिरक्तिमात्रया, प्रत्यहं त्रि र्जलेन देयम्। मकरध्वजस्य ¼, ½१ रक्तिमात्रया युतं वा मधुना पूर्वकल्पेन। वचामधुयष्टिपिप्पलीतुलसीमञ्जरीणां तोलकद्वयस्यार्धप्रस्थजले द्विपलावशिष्टः क्वाथः सार्धद्वितोलकसितायुतोऽल्पमात्रया प्रत्यहं पञ्च षड्वोत्कटकासशान्तये देयः। एवं हरीतकीकण्टकारिकामधुयष्टीनां क्वाथो मधुयुतः पूर्वकल्पेन योज्यः। किञ्च चातुर्भद्रचूर्णं मधुना ज्वरकासवमनातिसारनिवृत्तये सर्वथैवोपकारि। श्लेष्मकापाच्छ्वासरोधोपक्रमे नीलवर्णे च शिशावर्कदुग्धभावितं सैन्धवचूर्णं माषमात्रया दुग्धेन देयम्। न चेदनेन भवेद्वमनं ततो घण्टायाः परं पुनर्देयम्। सोमचूर्णं प्रातः सायं द्विरक्तिमात्रयोष्णजलेन श्वासनाड़ीस्तच्छाखाः प्रशाखाश्च प्रसार्याऽल्पेनैव कालेन कफं तनूकृत्य निराकरोति सर्वयोगेभ्यो वरम्।

अवसादकरी—पूर्वोक्तक्वाथैः सह पंचदश विंशतिर्वा विन्दवः कनकासवस्य देयाः। जातीफलादिचूर्णं वा मधुना (शा० ध०) लेहयेत्। धत्तूरवीजानां स्वरसस्य च वा योगा यथा-- उन्मत्तरसादयोऽ वसादकराः। श्वासे कासवेगे श्वसनकादौ च वातघ्नविषगर्भादीनां तैलानामभ्यञ्जनम्। अतसीखलोपनाहश्च ऊर्ध्वभागे वक्षः परितः। कदाचिन्नेत्रयो रतितरां रक्तस्रावाच्छ्वेत-

मण्डलं सर्वतो रक्तं, कठिनीभूते च तस्मिञ्छ्यावं दृश्यते, नात्र भयम् । उदुम्बरसार, रसाञ्जन, रक्तचन्दन स्फटिकाऽहिफेन हरीतकीनामेकशो द्विशः समस्तानां वा पुनः पुनर्वर्त्मनो र्बाह्र्लेपः ।

इत्युत्कटवातकासः ।

## कण्ठशालूकः । TONSILITES

कोलास्थिमात्रः कफसम्भवो यो, ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य स्तं कण्ठशालूकमिति ब्रुवन्ति ।

सु० नि० अ० १६ श्लो ५० ।

"कण्टकशूकभूतः" कण्टक इव शूकः, भूतः प्राप्त इति डल्वनः ।

दोषैः कफोल्वणैः शोफः कालवद् ग्रथितोन्नतः ।
शूककण्टकवत्कण्ठे शालूको मार्गरोधनः ।

वा० उ० त० अ० २१ श्लो० ४५

मार्गरोधनः श्वासमार्ग रोधनः । अत्र दाहशोथावन्यैश्च स्वलक्षणैर्युतौ भवतः । क्वचिदयं प्रधान उपसर्गभूतश्च जीर्णाजीर्ण भेदेनाऽपि द्विविधः । वहुषु रोगेष्वस्य मुखाङ्कुराः सर्वेऽपि वक्रियन्ते । अथवा तदन्तः पूयं ( विद्रधिः ) भवति । कष्टसाध्योऽय मतोऽस्य चिकित्सा सावधानतः कर्त्तव्या । कारणम्-मातापितृभ्यां, शीतात, गण्डमालातः ( क्षयप्रकृतेः ) आमवातस्य प्राक् पश्चाद्वा प्रवर्धते ।

लक्षणानि—(१) ज्वरः १०२ तो १०५ यावद्भवति ।

(२) आकर्णान्तं प्रसरति गलवेदना ।

(३) निगलने वाक्योच्चारणे च क्लेशः ।

(४) गलप्रदेशः सर्वदा शुष्कः क्षतयुतश्च ।

(५) स्वरभेदः ।

(६) ग्रीवासञ्चालनमल्पं भवति ।

गलपरीक्षायां प्रवृद्धो रक्तवर्णो दृश्यते शालूकः । श्वासान्नमार्गौ निरुध्यमानाविव च भवतः । प्रवृद्धौ चोभौ परस्परं स्पृशतः, प्रथममेकः पश्चादन्यः, उभौ वा सहैव वर्धेते । जिह्वापश्चाद् गलप्रदेश मुभयत उभौ प्रवृद्धौ पूगफलाभौ दृश्येते ।

अस्यां दशायां भवति प्रलापः । गोजिह्वा तालुप्रदेशश्च शोथेन रक्ताभौ, प्रवर्धते चापि गोजिह्वा । आपाततः शुष्कमिदं स्थानं परतो निर्यासस‌दृशेनाऽच्छाद्यते रसेन, किमपि निगलितुं न शक्यते, लाला च स्वयमेव मुखतः स्यन्दन्ते ।

हनुमण्डलयो ( Jows ) र्वेदनातिशयान्मुखव्यादानं कर्तु-मशक्तस्य गलपरीक्षा भवति कष्टसाध्या, तदर्थं शनैः शनैः कारिते मुखव्यादाने प्रवेशितायां च तत्र तर्जन्यां दृश्यते स्थाने स्थाने श्वेत-क्षतं पर्यन्तेषु रक्तवर्णम् । रसग्रन्थिषु शोथः, गलवेदना, शिरसि रुजा, अरतिः, जिह्वामलिनता, प्रश्वासे मुखे च पूतिगन्धिः, कोष्ठकाठिन्यं, क्षुदल्पा, मूत्रमतीव रक्तमिति । सुचिकित्सयैव साध्योऽयम् । कदाचित्पाकमप्येति क्रमशः । नचेत्पच्यते त्रिद्वादश-दिनाभ्यन्तरे प्रकृतिभावमापन्नोऽपि पूर्वापेक्षया किञ्चिद्वर्धित एव तिष्ठति ।

पच्यमाने च त्रिचतुरदिनानान्तरं भवति शीतपूर्वको ज्वरः, अतीव वेदनो ऽन्तरङ्गुल्येव घट्यते, दण्डेनेव च ताड्यते । पक्वः

प्रायः स्वयमेव विदीर्यते, अतसीखलोपनाहेन च त्वरितम्। निद्रितस्य विदीर्यते चेद्रक्तं पूयञ्चान्तरुदरं प्रविशति, अन्यथा मुखाद्वहि र्निस्सरति। स्थानिकलक्षणै रल्पायासेनैव रोगनिर्णयः। प्रायेणाऽयं न मारकः। कदाचिद् गलरोधात्पोषणाभावाद्वा मृतिरपि भवति। विदीर्ण एव विमुक्तो भवति क्लेशात्।

## चिकित्सा।

प्रथमावस्थायां सुचिकित्सया पाकं विनैव शाम्यति शालूकः। बालानां यूनां च हिङ्गुलेश्वर-बृहत्कफकेत्वादयो विषयुक्ता योगा मन्त्रवत्फलन्ति, जाते च शालूके त्रिचतुरघण्टामध्य एव विषयोगानां प्रयोगो प्रथममहोरात्रं यावदेव विधीयते न ततः। शालूके वृद्धेभ्यो विषयोगा न देयाः। तत्र प्रथमं मृदुविरेचनं दत्वा ततो घण्टाचतुष्टयेन हिङ्गुलेश्वरादयो मात्रया देयाः। आमवातिनां शालूके योगराज,चन्द्रप्रभा गुग्गुल्वादयः प्रयोज्याः। लक्ष्मीविलासस्तु सर्वेभ्यः सर्वदा हितः। प्रत्यहं कोष्ठशुद्धि श्च विधेया। रोगस्य प्रथमावस्थायां यदि प्रच्छनै रक्तविस्रावणं क्रियते तदा वेदना निवर्तते, न च सम्भावना पाकस्य। अत एव सुश्रुतः।

विस्राव्यकण्ठशालूकं साधयेत्तुण्डिकेरिवत्।

विस्राविते रक्ते पञ्चवल्कल—त्रिफला—उदुम्बरपत्रादीनां कषायवृक्षाणां क्वाथै र्गण्डूषाः। वातघ्नदशमूलादि क्वाथै र्वाष्पस्वेदो नाड़ीस्वेदो वा। अतसीखलेन गोधूमतुषलवणै रेकत उभयतो वा उपनाहस्वेदेन वेदनाशोथौ शाम्यतः, पच्यतेऽपि च

पच्यमानः । विदीर्णे च बलाधानाय-लौह-मकरध्वज-प्रवाल-अग्नि-तुण्डी वह्न्यादय आमवातप्रकृतिके तु रसोनपिण्डादयो देयाः । पथ्यम्—प्रदाहावस्थायां हिमशीतलं शीतलं वा दुग्धं पच्यमाने तु तदुष्णोष्णमेवदेयम् । पुनः पुनः प्रदाहदशायां त्वधो निर्दिष्टा प्रतिषेधिका चिकित्सा विधेया । (१) प्रत्यहं गलप्रदेशं परितः शीतलजलेन धावनम् । (२) सौभाग्यचूर्णं रक्तिकात्रयं (३) आकारकरभचूर्णं माषकद्वयं पलमितजले प्रक्षिप्य गण्डूषविधानेन पुनराक्रमणं निरुध्यते । (३) शालूकस्य छेदनानन्तरं गल-शुण्डीवत्क्रिया कार्या—गलशुण्डीन्तु सञ्छिन्द्य साधयेत्तु पिण्ड-केरिवदिति । सुश्रुतः—

## जीर्णशालूकचिकित्सा ।

प्रदाहस्य पुनः पुनराक्रमणाद्वर्धते शालूकस्तेन च बालस्योरः कपोतस्येव जायते । कदाचिज्ज्वरः, नातिशोभनं स्वास्थ्यम्, श्वास-क्लेशः, श्रवणे ऽल्पता, मुखेन श्वसनाज्जातै रितररोगैः सहैव बुद्धि-मान्द्यमपि, विपरिवर्त्तिताकृत्या मन्दत्वप्रतिभासः, पठने ऽप्यात्मनः सहपाठिभ्यः पश्चाद्भावः, गलपाकः, सर्वदा कासः, अल्पेनैवापथ्येन प्रतिश्यायः, श्वासवायोः पूर्णमात्रया ऽप्रवेशाद्रक्तस्य सम्यग् शुद्धे-रभावः, अस्यामवस्थायां दृष्टकर्मणा शल्यविदा तस्य मूलतश्च्छेदन-मेव चिकित्सा, यथा-सुश्रुतः--"शस्त्रनिपातसाध्यः" यद्यपेक्षया लघुः शालूक स्तदा खदिर, त्रिफला, पञ्चवल्कलोदुम्बरपत्रादि संकोचक क्वाथै रसकृद्गण्डूषाः । आकारकरभ-त्रिफला-चूर्णस्य, कालक

( च० चि० अ० २६ ) चूर्णस्य वा मधुना मर्दनम्, खदिरादि गुटिकाचूषणं वा। दायप्रकृतिश्चेद्रोगी—तदा १प्रवाल-च्यवन प्राश-मकरध्वजादिभिः क्षयापहै रुपचरेत। समुद्रतटाद्रौ जलवायु-परिवर्तनं च धनिनाम्। विधिनानेन महाञ्जीर्णो ऽपि शालूकः प्रतिनिवर्तते। किञ्च कटुकादिक्वाथो प्यत्र हितः (च०चि०अ०२६)

विहाय शालूकं नासापश्चाद्भागे ऽन्तर्गले क्षुद्रारसग्रन्थयो ( Adeniodes ) भवन्ति। यथा यथा वर्धते बाल स्तथा तथा रसग्रन्थय स्तनूभवन्ति, केषुचिच्च बालेषु प्रवृद्धा एव तिष्ठन्ति। यद्येताभिः शालूक एकत उभयतो वा प्रवृद्ध एव तिष्ठति यथा भवत्यपि प्रायशः, तेनापि बालस्य स्वास्थ्यं न शोभनं भवति, न-च पुष्टिः समुचिता, कर्णकुहरेणैतेषां सम्बन्धात्कर्णरोगा जायन्ते रुजा च तत्र। श्वासक्लेशाज्जडः शुष्ककासार्तः पुराणप्रतिश्याययवान्। अर्धव्यात्तमुखेन विशेषतो निद्राणो घुघुरायते बालः। अत एव चरकः—

"अन्तर्गले घुघुरिकान्वितं च शालूकमुच्छ्वासनिरोधकारि। अत्र निरोधकारित्वादेतेऽपि रसग्रन्थयः शालूकान्तर्गता एव, अत एते, उपशालूका इति।

---

१ उपजिह्विकायामधिजिह्विकायां गलशुण्डिकायां शुष्ककासे गल-दाहेन क्लेशे कसनाद्वमनवेगे च प्रवालभस्म अत्युपकारकमिति वृद्धवैद्याः। अत्यल्पमात्रया दीर्घकालं सेव्यमानं ताम्रभस्मोपकारकं स्याच्छालूके। अस्पष्टश्रवणे च स्वर्णबङ्गमुपकरोति।

## उपशालूकचिकित्सा

प्रत्यहं त्रिश्चतुर्वा बब्बूरखदिरादिकषायवृक्षक्वाथैर्गण्डूषाः, पलमिते जले ५ रत्तिकं स्वर्जिक्षार मवाप्य धारायन्त्रेण तेषां धावनम्। एवं नचेच्छाम्यन्ति ततोऽस्त्रचिकित्सा। यत्र शालूके ज्वराद्युपद्रवा स्तत्र कदाचिद्रोहिण्याः सन्देहे रोहिणीप्रतिषेधक-❀ द्रवस्योदरपार्श्वे त्वाचप्रवेशः। इतिशालूकः। १

## तूनी RENAL COLIC

वायुना भिन्नाऽश्मरी ( stone ) वृक्काभ्यां बहि र्निर्गच्छन्ती गवीन्यो Ureters र्मध्ये सक्ता, ततोऽधो ऽधो वस्तिं प्रत्युपसर्पन्ती वा घर्षणजामसह्यां वेदनां जनयति। इयमेव "तूनीत्युच्यते" यथा-सुश्रुतः।

अधो या वेदना याति, वर्चोमूत्राशयोत्थिता।
भिन्दतीव गुदोपस्थं सा "तूनी" त्युपदिश्यते॥

सु० नि० अ० १ श्लो० ८५।

वेदना चैषा कटिप्रदेशत आरभ्योदरस्य दक्षिणवामपार्श्वयो रधोऽण्डकोषमभिव्याप्ता भवति, सर्वं वा उदरं व्याप्नोति, अण्ड-कोषादाजघनं प्रसरति। अत्र-सुश्रुतः।

मूत्रस्रोतः प्रवृत्ता सा सक्ता कुर्य्यादुपद्रवान्।
दौर्बल्यं सदनं कार्श्यं, कुक्षिशूलमथाऽरुचिम्।
पाण्डुत्व मुष्णवातं च तृष्णां हृत्पीडनं वमिम्॥

नि० अ० ३ श्लो० ११

---

❀ Diphtheria anti toxin serum

अण्डकोषौ सङ्कुचितौ, स्पर्शने च सवदनौ, असह्यवेदनया ताम्यति, उत्तिष्ठति, उपविशति, स्वपिति, इतस्ततो लुठति, अरति-पीड़ितो दन्ता न्खादति, कथमपि न स्थिरो भवति, मुखे वेदनया पाण्डुता, शिरसि स्वेदबिन्दवः, ईषच्छीतावबोधः, कदाचिद्वेपथुः, श्वासः, नाड़ी त्वरितगतिः, ईषज्ज्वरः, हृल्लासः, वमनम्, कदाचिन्म-न्दायते वेदना पुन र्वर्धते च। वस्तिमभिप्रपन्नायामश्मर्यां शाम्यति वेदना।

"मूत्रवेगनिरस्ताभिः प्रशमं याति वेदना॥"

अश्मर्यां चिपिटायां क्षुद्रायां च वेदनाया अल्पता, तस्यामेव पुनः कर्कशायां१, प्रचुरता, मुहुर्बिन्दुशो मेहनम्, मूत्रमल्पं कदाचित्सरक्तं च, कदाचिद्वेदना एकं दिनं दिनद्वयं वा न भवति, पुनरतिशयेन भवति। कदाचिद्वेदनाऽभावस्य कारणम्। यदा भवत्यश्मरी महती तदा गवीन्योः प्रवेशमलभमाना पश्चाद्वृक्कावेव प्रतिनिवर्तते। तदा वेदनाऽपि सर्वथा शाम्यति। वृक्कयोः स्थिता च पृष्ठे कटिप्रदेशे च वेधनवत्करोति वेदनाम्। सम्भवत्यतो मूत्रे रक्तं पूयश्च। कदाचिद्रक्तपिण्डो गवीन्यो र्गमनागमनं करोति, तत्रा ऽपि तूनीसदृशमेव भवति शूलम्।

यद्यपि तूनीलक्षणे ऽश्मरी शब्दो न पठितो न चाप्यश्मरी-प्रकरणे तूनी पाठः, न च पूर्वोक्तानि वृक्काश्मरी लक्षणानि सर्वाणि संगृहीतानि। तथापि—ऋषयो हि सूत्ररूपेणैवानुक्तविषयं ध्वनयन्ति। तथाहि "सूत्रं हि ध्वनति भ्रमति घूर्णति मुहूर्त्तमपि

---

१ श्यावारुणाश्मरी चास्य स्याच्चिता कण्टकैरिव।

नावतिष्ठते" इति व्याकरणमहाभाष्ये— एवं यकृदश्मर्याः Gall stones प्रतितून्याः स्पष्टतया ऽनिर्देशेऽपि 'क्रमेण पित्तेष्विव रोचना गोः' अनेन वाक्येन यकृदश्मरी स्पष्टमेव प्रतिपाद्यते। यदुच्यते-प्रधान लक्षणानि किमर्थं नोक्तानीति—अत्रोच्यते तन्त्रयुक्तिन्यायेन—शूलाश्मरीशर्करामूत्रकृच्छ्रादिरोगै स्तानि तानि लक्षणान्यत्राप्यतिदिश्यन्ते, समानतन्त्रेषु वृक्काश्मरीवर्णनात् "विशोषयेद्वस्तिगतम्" 'क्रमेण पित्तेष्विव रोचना गोः' इति वाक्यद्वयं यकृदश्मरीवृक्काश्मरी शुक्राश्मरीणा (Prostatic-culculi पौरुषग्रन्थ्यश्मरी)मुपलक्षणम्। "न तत्रं दृष्ट्वा वाचं विसृजेदितिवत्" प्रत्यक्षोऽपि स्थानेष्वेषु दृश्यन्ते ऽश्मर्य इत्याद्यूह्यम्।

## तूनी चिकित्सा

आदौ शूलः कुक्षिदेशे कटौ स्यात्पश्चाद्रोधो जायते मूत्रमुष्णम्।
एतै र्लिङ्गै रश्मरीरोगचिह्नं ज्ञात्वा कुर्याद्भिषजाद्यौ श्चिकित्साम्।
यो० र० अश्मरी।

शूलवेगकाले येन केनाऽप्युपायेन शूलनिवारणं[२] विधेयम्। यथा (ख) गवीनीमध्यान्निःसृत्याऽश्मरी वस्तौ पतेत्तथाप्रयतनीयम्। एतदर्थं मूत्रप्रवर्धनाय मूत्रालौषधीनां प्रयोगो विधेयः। तत्र प्रथमं शूलनिवारणाय—कर्पूराहिफेनशुण्ठीनां समांशानां चतूरक्तिकावटी प्रचुरेण शीतलजलेन देया, प्राक्चैतस्या स्वर्जिक्षारो यवक्षारो वा दशरक्तिक श्चतुष्पलोष्णजलेन दुग्धेन वा देयः। अनया सम्भ-

२ मौफियात्वाचप्रवेशेन तत्कालं शूलावरोधः। वृक्कामयिनस्तु स्वच्छं क्लोरोफौर्मं मुखप्रोञ्छने ( रूमाल ) विकीर्याऽघ्रापयेत्।

वेन्निद्रा, नोचेद् घण्टायाः परं पुनर्देया। निद्राभङ्गे च पूर्वकल्पेन स्वर्जिक्षारः पुनर्देयः। तिलक्षारस्तु विशेषेणाश्मरी भेदनः। तिलापामार्गकदलीपलाशामलकक्षारा एकशो द्विशः समस्ता वा अविमूत्रेण द्विगुञ्जमात्रया देयाः। यदि रोगिणो वृक्करोगः Bright's Disease तत्रा ऽहिफेनप्रयोगो न कार्यः।

वमनं लङ्घनं स्वेदः पाचनं फलवर्त्तयः।
क्षारा श्चूर्णानि गुटिकाः शस्यन्ते शूलशान्तये ॥

तत्र—उष्णजलेन सेकः, उष्णजले-उपवेशनमुपनाहस्वेदो वालुकास्वेद इत्यादीनि हितानि।

क्षारोष्णतीक्ष्णौषधमन्नं पानं।
स्वेदो यवान्नं वमनं निरूहाः ॥ च॰ चि॰ अ॰ २६ श्लो॰ ५२

यवस्य पेयां मधुना विमिश्राम्।
पिबेत्सुशीतां मनुजः सुखार्थी ॥

कुलत्थानां २ तो॰ गोक्षुरस्य १ तो॰ अर्धप्रस्थजले विपाच्य पादावशिष्टः क्वाथः पलमात्रया द्विः प्रयोज्यो घण्टामर्यादया।

पाषाणभेदवरुणगोक्षुरकपोतवङ्कजः क्वाथः।
गिरिजतु गुड़प्रगाढ़ः कर्कटिका त्रपुसबीजयुतः ॥
पेयोऽश्मरीमवश्यं दुर्भेदामपि भिनत्ति योगवरः१।

चि॰ सा॰ सं॰ अश्मरी

२. यथा न पुनः सम्भवेदश्मरी, सञ्चिता च वृक्के पतेत्तदर्थं प्रयतितव्यम्।

---

१ पाश्चात्यभिषग्भिरप्यादृता विमौ।

तत्र—कुष्माण्डकरसं पीत्वा सयवक्षारशर्करमिति ।

चन्द्रप्रभावटी—तारकेश्वरो ( शुद्धसूतं समं गन्धमित्यादिः । ) योगेन्द्ररसो वरुणादिलोहः शिलाजतुयोग स्तृणपञ्चमूलीक्षीरम्, वरुणादितैलनारायणतैलाभ्यञ्जनम् ।

वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम् ।
यवक्षारं गुडं दत्वा क्वाथयित्वा जलं पिबेत ॥
अश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम् ।

इत्यादीनां मासत्रयं सेवनम् । प्रतिसप्ताहं च प्रातः कालिकमूत्र परीक्षणम् । वस्तिगताऽश्मरीचिकित्सा चात्रानुसन्धेया । सङ्गसरेमाही । ४ र० ( चिपिटाकारद्दृषद्विशेषः ) हजरलयहूद ४ र० ( पत्थरबेर ) सोरकक्षारः ४ र० त्रयमप्येकत्र गोक्षुरशतपुष्पा-क्वाथेन देयं वृक्कस्थाश्मरी वस्तिव्रणश्च निवर्तते । इतितूनी ।

## प्रतितूनी

### BILLIARY COLIC OR HIPATIC COLIC

गुदोपस्थाऽस्थिता सैव प्रतिलोमविसर्पिणी ।
वेगैः पक्वाशयं याति प्रतितूनी तु सा स्मृता ॥

सु० नि० अ० १ श्लो० ८६ ।

यकृदश्मरी (Gall stone) इयं पित्ताशय उपलभ्यते । आकारश्चास्याः साधारणवालुकात आबदरास्थिवद्भवति । कदाचिद्विंशतिः पञ्चविंशति र्वा सम्भवन्त्येकत्र । क्वचिदेकैव प्रवर्धमाना पित्ताशयाकृतिं धारयत्यपि च । यावत्पित्ताशयमधिवसति न ताव-

त्क्लेशदा। एतास्वेका बह्व्यो वा स्वस्थानाद्वहिरागत्य पित्तनलिकापथं प्रवृत्ता दारुणां वेदनां जनयन्तीदमेव यकृच्छूलं प्रतितूनी वा कथ्यते। कदाचिच्च क्षुद्रा अश्मर्यः पित्तकोषान्निसृत्य पित्तनलिकयाऽऽन्त्रमार्गेण मलमिलिता वहि र्निर्गच्छन्ति नात्र दुःखलेशोऽपि रोगिणाऽनुभूयते।

## लक्षणानि।

१ असह्या वेदना। २ कामला।

१ अश्मर्यां पित्तकोषान्निर्गत्य पित्तनलिकापथप्रवृत्तायां तत्र सक्तायां वा तस्या अन्त्राधिगमनात्प्राक् दारुण वेदना पित्तनलिकाया सङ्कटमार्गस्य घर्षणादश्मर्या। अन्त्रागतायां तदुपशमः (पित्तकोषस्य पित्तनलिकाया तस्या श्चान्त्रेण सम्बन्धात)। २ जात्वश्मरी पित्तनलिकायां सक्ता पित्तमार्गं निरुणद्धि, अतः पित्तमन्त्रं न प्राप्नोति प्रतिनिवृत्य रक्तं प्रविश्य कामलां जनयति।

शूलं च पित्तकोषात्सहसोत्थाय सर्वस्मिनुदरे पश्चात्पृष्ठे, आदक्षिणस्कन्धं प्रतिलोमं प्रधावति। वर्धते यकृत् विषवज्रकल्पशूलेन रतिं न लभते। मुखं पाण्डुवर्णम्, नाडी क्षीणा, विन्दुशः स्वेदोद्गमः, शीतलं शरीरम्, कदाचिदसह्यवेदनया मूर्च्छा कम्पश्च, ज्वरश्च १०२·१०३ यावत्, वमनहृल्लासौ, (यावदश्मरी नान्त्रं प्राप्नोति तावद्भवति शूल मन्त्रमधिगतायां च शान्ति मेति) चालन्या मलगालने च तत्राश्मरी लभ्यते। कदाचिदश्मरी पित्तकोष मेव पुनः प्रतिनिवर्त्तते न चान्त्रं याति। कश्चिद्यावज्जीवं पित्तकोषमध्यास्ते न च भवति क्लेशलेशः केवल शवच्छेदकाले दृश्यते। यदा चाधिक-

कालं पित्तनलिकायां सक्ता भवति तदा कुम्भकामलां करोति, वर्धेते च यकृत्पित्तकोषौ, यद्यल्पकालं सक्ता भवति तदाऽल्पा कामला। प्रतितूनीशूलारम्भे प्रायो भवति वमि र्वम्या च पित्तनाड़ीशिथिलता मापद्यते, ततः क्षुद्राश्मरी पित्तकोषमेव प्रतिनिवर्त्तते चेत्तदा तत्कालं वेदना ऽपि शाम्यति।

येषां कामला भवति तेषां निवृत्ते ऽपि शूले कञ्चित्काल मरुचि-हृल्लासाऽलस्य-दुर्वलतापीतमूत्रतादीनि भवन्ति। केषांचिच्चाल्पं भवति प्रतितूनीशूलं क्षुद्रत्वाद्वालुकानिभाना मश्मरीणां पितनलि-कापथतः सुखेन निःसरणात्। तल्लक्षणम् १ अग्रपत्रका (कौड़ी) ऽधो वेदना—२ मन्दाग्निः, ३ सायमल्पो ज्वरभावः, ४ सामान्या कामला ५ पित्ताशयोपरि निपीडनाद्वेदना।

## प्रतितूनी चिकित्सा

द्विभागविभक्तेयं चिकित्सा—१ वेदनारम्भे वेदनासमये वा २ यदा वेदना न भवति तदा।

१ वेदनासमये चिकित्सायाः प्रयोजनद्वयम्। (क) यन्त्रणा निवारणम्। (ख) यदा च वेदना बहुकाल तिष्ठति, तदा पित्त-नाड़ी Bileducts तो ऽश्मरीणां बहिष्करणं च। शूलवेगाना मन्त राले ऽपि चिकित्साया उद्देश्यत्रयम्। (क) यथा पुनरश्मरी नोत्पद्येत तद्र्थौषधप्रयोगः (ख) पित्तकोषे स्थितानां वहिष्करणम्। (ग) द्रावकौषधै र्द्रावणम्। यदि पुनरश्मरी विपुला तद्रावणे न समर्थं क्रिमप्यौषधम्

असह्य शूल१ निवारणो पायः।

अभयनृसिंहरसस्य (भै० र० अतिसार) सार्धरक्ति जले घोलयित्वा देयाऽर्धघण्टामध्ये वेदना निवृत्ति र्भवति। सत्यामावश्यकतायां घण्टाद्वयात्परं पुनः प्रयोगः। विंशतिविन्दुमात्रया अहिफेनासवो ( रसतरङ्गिणी २४ त० ) वा।

पुंसः शूलाभिपन्नस्य स्वेद एव सुखावहः।

पायसैः कृशरैः पिण्डैः स्निग्धै र्वा पिशितोत्करैः॥

काचकुप्यां Bottle रबरप्रसेविकायां (थैली) वा उष्णजलं सम्पूर्य तन्मुखं मुद्रयित्वा यकृति स्वेदः। दारुहैमवतीत्यादिः३३ पृष्ठोक्तो लेपो वोष्णः पित्तस्य क्षरणं द्रवतां च करोति। यदि वेदना दीर्घकालमनुवर्त्तते तत्र वर्धते यकृच्छूलं च तदा यकृदुपरि चतस्रो जलौकाःपातनीया भवत्यनेन लाभातिशयः। यत्र च घोरवेदनया क्लान्तः शीताभिभूत Collapes श्च तत्र मृतसञ्जीविनीसुरा, वसन्तकुसुमाकरादिभि रुपचरेत् घण्टाद्वयेनाऽऽस्वास्थ्याऽऽगमनम्। आध्माने कोष्ठबद्धतायां च माषकद्वयसरलतैल Terpentin oil युतया शोधनद्रव्य (साबुन) वस्तिना कोष्ठशुद्धिं विदध्यात्। नात्र विरेच्यो भवति रोगी। जैतूनतैलं Olive oil प्रतितूनीशूले महौषधम्। वेदनाकाले वेदनाहरमश्मरीनिस्सारकं पित्तस्रावकरं पुनरश्मरीसञ्चय निवारकमिति

---

१ मौर्फिया इत्यस्य त्वक्द्वारान्तः प्रयोगं स्वच्छ क्लोरोफौमांऽ pure chloroform घ्रापणं वाऽसह्यवेदना प्रतिरोधकम्। वेदना काले सोडासिलिसिलास २॥ र० सोडाबाईकार्ब ५ र० द्वयमपि दशतोलकोष्णजलेन सम्मिश्य उष्णोष्णमेव देयमनेन पित्तस्य क्षरणं द्रवता च भवति।

यथा—जैतूनतैलस्य पलद्वयं मृतसञ्जीविनीसुराया स्तोलकं, पोदीन-स्वरसस्य तोलकद्वयमित्येका मात्रा। यवानीक्वाथो वा पोदीनस्वर-साऽभावे भवत्यनया त्वरितशूलोपशमो वमननिवृत्तिश्च। पुनरश्मरीसञ्चयनिवारणाय च प्रत्यहं रात्रौ भोजनाद्घण्टात्रयात्परं शयन-समये त्रिंशद्बिन्दवो जैतूनतैलस्य मृतसञ्जीविन्या अर्धतोलकं यवानीक्वाथस्य तोलक मित्येकामात्रा सेव्या। प्रात र्मलपरीक्षया प्राप्यन्तेऽश्मर्य स्तत्र।

शूलोपशमे यावन्न भवति पुन स्तद्वेग स्तन्मध्यकालिकी चिकित्सा।

पित्तकोषे यावत्यो ऽश्मर्यः सन्ति तासां प्रचुरपित्तस्रावकौषधै र्बहिष्करणम्। तत्र रसचूर्णं (पारदस्य श्वेतभस्म) ½ र० पीतमूली-सत्वं ( उसारे रेवन्द ) २ र०—इत्येका मात्रा रात्रौ शयनवेलायां देया, प्रात र्हरीतकीखण्ड ( भै० र० व० शू० अधिकारे,त्रिफलाऽब्द-मित्यादिः ) तोलकं चतुष्पलोष्णजलेन देयं यथा—सर्वतो मल-शुद्धिः स्यात्। अशुद्धौ पुनर्देयम्। पित्तस्रावद्रावतनूकरं ताम्रभस्मै-करक्तिक मर्धपलजैतूनतैलेन दत्तं भवति कार्यसिद्धये— इति वृद्धाः। एवं पञ्चकोलक्वाथेना ऽपि ताम्रभस्मप्रयोगः। नारिकेललवणस्य द्विमाषमात्रया, उष्णजलेन त्रिः प्रयोगः शूलवेगकाले ऽपि च क्रियते। "लवणो नारिकेलाख्यः पित्तशोषजशूलनुत्" ( र० त० १४ त० ) मूलकपत्रशाकसेवनेना ऽपि न सञ्जायते पुनरश्मरी कामला ऽपि निवर्तते। व्यवस्थितास्वपि पूर्वोक्तौषधिषु प्रत्यहं प्रात र्मध्याह्ने, रात्रौ भोजनात्प्राक्, पञ्चरक्तिकः स्वर्जिक्षारः soda bicarb चतुष्पलोष्ण-जलानुपानेन प्रयोज्यो द्रवत्यनेन पित्तं ततस्त्वरितं बहि र्निर्गच्छ-

स्यश्मरी। एवं सरलतैल Terpan tine oil जैतूनतैल, जयपालतैल, पाषाणभेद (पत्थरफोड़ी१) गोक्षुर कारवेल्ल-कोकिलाक्ष, गुडूची, ताम्रभस्म, पारद, स्वर्जिक्षारा इति पित्तस्रावकोगणः। वह्निसन्दीपनार्थं महाशंखवटी स्वल्पाग्निमुखचूर्ण लवणभास्करादयः प्रयोज्याः

तूनी प्रतितून्युदरशूलानां परस्परं विशेषः।

| तूनीशूले | प्रतितूनीशूले |
|---|---|
| सहसा वृक्कप्रदेशात आरभ्याऽध उदरं लिङ्गं चाऽभिव्याप्नोति शूलं। स्वेदो वमि मूर्च्छाऽपि च भवति। सहसा शाम्यति केवलं वृक्कोपरि गवीन्याञ्च सामान्यरूपेण तिष्ठति। | वेदनादिना त्पूर्वदिनेषु भवत्युत्क्लेशः। |
| | ततः परं सहसा यकृति, दक्षिणपार्श्वाऽधो दारुणं शूलं यकृत्प्रदेशतो दक्षिणपृष्ठभागमाक्रम्याऽऽदक्षिणस्कन्धमनुव्याप्नोति |
| मूत्र मल्पं कदाचित्सरक्तम्, मुहु मूत्रणेच्छा, विन्दुशो मूत्रणम्। न वयोभेदमपेक्षते। | स्वल्पो ज्वरः १००-१०१ कामला वमनस्या पि सम्भवः। |
| | अन्यानि यकृल्लक्षणानि। |
| विशेषेण पुरुषाना क्रामति। | ३०वर्षा त्परं प्रायश्च स्त्रीष्वेव |
| प्रायो भवत्येकस्मि न्पार्श्वे। | विशेषेण दृश्यते। |
| कदाचिन्मूत्रेण सह शर्करानिरेति। | |

---

१ इयमेव निश्चितपाषाणभेद इति वैज्ञानिकाः। एकाक्यपि प्रयुक्ताऽश्मरीं दारयति। प्रत्यक्षफलदतया प्रचारार्थं संग्रहोऽप्यस्याऽस्माभिः कृतः।

## उदरशूले

एतच्छूलं सर्वमुदरं व्याप्नोति । निपीड़िते चोदरे शूलोपशमः । पूर्वदिनभोजनाऽपचारतो भवति । आध्मानातिसारवमनादीन्यजीर्णलक्षणान्यत्र । लिङ्गवयो भेदो न ।

## पथ्यम् ।

स्नेहमयद्रव्य मश्मरीं जनयत्यत स्तत्परिवर्जनीयम् । मिष्टमल्पम् । मत्स्यमांसमण्डानि च वर्ज्यानि । सद्यः समाहृतानि शाकफलानि तु प्रचुराणि सेव्यानि । यकृदश्मरीमता मतिपरिश्रमो निषिध्यते । प्रत्यहं प्रातः सायं परिभ्रमणमुचितम् । मानसिकपरिश्रमोऽप्यल्प एव । प्रत्यहं कोष्ठशुद्धिश्च ।

इति प्रतितूनी ।

---

# रोहिणी[1]

वातपित्तकफा यस्य युगपत्कुपितास्त्रयः
जिह्वामूलेऽवतिष्ठन्ते विदहन्तः समुच्छ्रिताः ॥
जनयन्ति भृशं शोथं वेदनाश्च पृथग्विधाः
तं शीघ्रकारिणं रोगं रोहिणीति विनिर्दिशेत्
त्रिरात्रं परमं तस्य जन्तोर्भवति जीवितम्
कुशलेन त्वनुक्रान्तः क्षिप्रं संपद्यते सुखी
( च० सू० अ० १८ श्लोक २४–२७ )

## कण्ठगतास्तु रोहिण्यः—

गलेऽनिलः पित्त कफौ च मूर्च्छितौ
पृथक् समस्ताश्च तथैव शोणितम् ।
प्रदूष्य मांसं गलरोधिनोऽङ्कुरान्
सृजन्ति यान् साशुहरा तु रोहिणी ॥
जिह्वां समन्ताद् भृशवेदना ये मांसाङ्कुराः कण्ठनिरोधिनः स्युः ।
तां रोहिणीं वातकृतां वदन्ति वातात्मकोपद्रवगाढ़युक्ताम् ॥

---

१ Diphthirea

क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्त निमित्ततः स्यात् ।
स्रोतोनिरोधिन्यपि १ मन्दपाका गुर्वी स्थिरा सा कफ सम्भवा वै ॥
गम्भीरपाकाऽप्रतिवारवीर्य्या त्रिदोषलिङ्गा त्रयसम्भवा स्यात् ।
स्फोटाचिता पित्तसमानलिङ्गा साध्याप्रदिष्टा रुधिरात्मिकेयम् ॥

(सु० नि० अ० १६ श्लोक ४६-४९,)

सान्निपातिकीयं त्वरितमारिकासंसरणशीलाणुवीक्षणिक—उद्भिज्जजीव २ विशेषविक्रिया जन्यैवेति कुशलाः ।

स्थितिश्चास्याः अन्तर्गले काकलक (गलशुण्डिका) पश्चाद्भाग उपजिह्विके ३ परितः । इतोऽन्यत्रापि चक्षुः, योनिं, भगं, मणिं, तत्त्वचं, गुदमनावृतव्रणं समाक्रम्य तत्राप्यप्रकृतस्तरं जनयति । तथा प्रसवात्परं प्रसवपथं गता तीव्रप्रसूतासन्निपातेन मारयति प्रसूताम् । न चास्या बीजं रक्तेन सह सञ्चरति । प्राप्यते चान्तर्गले प्रोक्तस्थानेषु सन्तानिकावत्स्वच्छकृत्रिमस्तरेऽणुवीक्षणपरीक्षया । स्तरश्चायमनेकस्तरसज्जितः, प्रथमं कोमलस्वच्छसन्तानिकावत्ततः क्रमेण कठिनो दृढ़ ईषद् हरिद्रावर्णश्च, प्रबले च रोगे श्यावो भवति । स एवास्य वासभूमिः । महती ४ संक्रामिकेयमेकवर्षवयस्त आषड् वर्षवयस्कान् बालान्

---

१ Thrombosis

२ Klebs-Loffler-Bacillus.

३ Tonsils.

४ Contagious-Disease.

विशेषेणाऽऽक्रामति दुस्तरा च भवति, ज्यायसोऽप्याक्रमत्येव। येषां च प्रायोऽन्तर्गले, वेदना कण्ठशालूकः, १ दन्तशोथः, दन्तकृमिः तांश्च झटित्याक्रामति। एकवारं जाता च भूयोऽपि भवति। वैद्यान् परिचारकानन्यांश्च रोगिणो गलपरीक्षणे क्रियमाणे सेवायां वा तन्मुख निर्गत निष्ठीवन, कफ, लाला, नासा क्लेदादिभ्यो, रोगि व्यवहृत वस्त्रद्रव्यादिभ्यश्च। एवं गोवत्सकानामपीयं भवति, रोगिणा वत्सेनकृते मातुस्तनपाने ततस्तनपिप्पलतो दुग्धद्वारेण संसरति।

केषाञ्चिज्ज्यायसामपि रोगनिर्मुक्तबालानामिव भवत्यन्तर्गले बीजमस्या रोगविषसोढृप्रकृतितया च नते पीड्यन्ते। रोगवाहकत्वेन च भवन्ति रोगसञ्चारहेतवः। चयावस्था चास्या–दिनद्वयत आपञ्चदिनं क्वचिदाद्वादशाहम्।

## लक्षणानि।

निगिलनेऽन्तर्गले वेदना गलपरीक्षायां चोपजिह्विके परितोऽतीव रक्तता ज्वरश्च १०३°—१०४° इतोवाप्यधिकः। प्रथमं मृदुतालुनि श्वेताबिन्दवो दृश्यन्ते ततोऽन्तर्गलेऽध्युपजिह्विकयोश्च स्वच्छसन्तानिकावद्दृश्यतेस्तरः ३ शोथो वेदना च। तत एकेन

---

१ Tonsils.

२ औपसर्गिकत्वं चास्याः—"औपसर्गिकरोगाः शीतलिकादयः" इतिऽल्वने आदिपदा जज्ञेयम्। चाद्वा।

३ False Membrance.

दिनेन, दिनद्वयेनवा परस्परमेंकी भवति स स्तरः। तदनु ग्रसनिका १ श्वासपथ-नासाऽधोमार्ग–कर्णमध्यं २ यावत्प्रसृत्य श्वासरोधाय कल्पते। ग्रसनिकामेव चाऽधिक्येन समाक्रामत्यपेक्षया। नाड़ी वेगवती, पाण्डुतानैर्बल्ये, शिरोरुजा क्षुदभावादयः। आक्षेपश्च प्रायो भवति बालानां। प्रायः प्रथमत जानुक्षेप ३ वसामेहौ ४ आरोगान्तं वर्तेते। मूत्रक्षारस्य ५ वृद्धिः। किं बहुना--यत्र यत्रास्य प्रसारस्तत्रतत्र दाह शोफ लक्षणानि प्रादुर्भवन्ति। यथा–नासिकां गते—ततः पेयनिर्गमो रक्तस्रावो मुखेन श्वसन मनुनासिकोच्चारणं क्लेद निर्गमश्च। शोणितजा सम्भावनीयेयम्। श्वास ६ पथे-स्वरयन्त्रगे कांस्यपात्रहतध्वनिवद्वीभत्सः कासो घरघर शब्दः, पुनः पुनः श्वसीति पर्शुकामध्यं श्वासप्रश्वासेऽन्तः प्रविशति। मुखं चक्षुषी शरीरं च श्यावं ७ भवति। महाश्वासः। ततश्चाधः क्लोमशाखां प्राप्ते तत्र प्रदाहः ८ उभयत्र चात्र श्वासरोधेन मृति र्भवति। "कफादन्तर्बहिः शोथः श्वासः कण्ठश्च वाध्यते। यस्य सोऽसून् त्यजेद्रोगी त्र्यहाद्रोहिणिपीडितः।" भोजवचनेनानेना स्यार्थस्य साम्यं भवति। कर्णमध्यंगते कर्णदाहः। त्रिविधेयम्।

सौम्या—मध्यमा-तीव्रा च। तत्र मध्यमोक्तलक्षणा। तीव्रायां कम्पः प्रलापः वमनाक्षेपौ ज्वरश्च १०५°—१०६° यावद्भवति।

---

१ Pharynx अन्नपथमुखम्। २ Middle, ear.
३ Knee-Jerk. ४ Albuminuria.
५ Uric-Acid ६ Laryngeal-Diphtheria.
७ Cyanosis ८ Bronchopneumonia.

"उष्यते चुष्यते पित्तात् धूप्यते परिदह्यते अङ्गारैरिव"—अनेन भोजवचनेनास्यार्थसाम्यम् । मृद्वसम्बद्धप्रलापः प्रधानं लक्षणानामस्याम् । यदि स्तरोऽयं कथमप्याकृष्यते ततस्तदन्तर्दृश्यते रक्त वर्णनातिचिराच्चतत्स्थानं पूर्ववत् स्तरेणाच्छाद्यते च—त्रिश्चतुर्वा । यत्र च रोग लक्षणानि क्षीयन्ते क्रमेण, तत्रैकदाऽपगते न पुनरुत्पद्यते स्तरः । चतुष्पञ्चभिर्दिवसैर्हीयेते ज्वरशोथौ । बहिर्गलप्रदेश उच्छूनाश्च रस १ ग्रन्थयो दश द्वादशभिर्दिनैः क्रमेण स्वावस्थां यान्ति । येषांचोत्तरोत्तरं वर्धते ज्वरस्तेषां महाश्वास स्तरश्चाऽनासान्तं प्रसरति ततः श्वासरोधः ।

स्थिति कालश्चास्यास्त्रिदिनादारभ्याऽचतुर्विंशतिदिवसम् ।

शेषोपद्रवाश्च—गलक्षतम् ,२ हृत्सादः, नाडीगतिश्च प्रतिमिटम् ५०-४० क्वचित् २० हृदन्तस्त्वचित्क्षतम् २, श्वसनक, स्रोतोनिरोध ३, मस्तिष्कदाह, पक्षाघातादयः । एषु मृदुतालुनि पक्षाघातो बहुशो भवति सचारोग्यात्परं द्वित्रसप्ताहैः । तत्र निगलने वेदना तदक्षमता च भुक्तञ्चनासिकयानिरेति "तालु शुष्यति कण्ठश्च वातेनायम्यते यदा"अनेन भोजवाक्येन साम्यंभवति अर्थतः । भाविफलमशुभम्—विशेषेण बालानाम् । ज्वरस्य मृदुत्वेऽदुर्वले च रोगिणि ह्रस्वेऽल्पस्थानव्याप्ते, चाप्रकृतस्तरे शुभम् । रसग्रन्थीनां शोथे नासिका कोमलतालुभ्यां रक्तस्रावे स्तरे चाधिकदेशव्याप्ते

---

१ मांसाङ्कुराः । २ उभयत्रमांसदूषणाद्गम्भीरपाकिन्यनिवार्यवीर्य्या । ३ Thrombosis.

लालामेहे प्रवृद्धे, सर्वत्रव्याप्ते च रोगे, कण्ठनाड्यां नासागुहायां वा रोगव्याप्तौ नितान्तममङ्गलम् ।

## रोगनिर्णयः ।

दृष्टे च स्तरे न दुरूहो रोग निर्णयः । सन्देहेऽणुवीक्षणपरीक्षया निर्णयः । अन्यरोगेभ्यो विशेषस्त्वाकरेभ्योज्ञेयः ।

अथ रोहिणी Dipthiria एवास्ति नवेति विचार्यते । गलरोधिनोऽङ्कुरान् अत्र अङ्कुरशब्देन उपजिह्विकेरसग्रन्थयश्चोच्छूना अभिनवोद्भिदो लक्ष्यन्ते । दृष्टश्चाङ्कुरशब्दो "मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसि तान् जगुः" वाग्भटः । "प्रदूष्यवली मांसप्ररोहाञ्जनयन्ति" इति सुश्रुतश्च इत्यादौ बिम्बी वदरी फल सदृशेर्थे । यद्यपि "रूढ़धान्याङ्कुराकारा" अत्र न तादृशेर्थे दृश्यते, तथापि पूर्वत्र उक्तेर्थे एव व्याख्येयो गलरोधि शब्देन सहान्वयात् । ( गलशब्दश्चात्रश्वासान्नपथ मुखवाचकः ) न च केष्वपिगलरोगेषु रूढ़धान्याङ्कुराकारा मांसाङ्कुरा दृश्यन्ते न चापि समानतन्त्रकारैस्तथा व्याख्यायन्ते ।

जिह्वासमन्तादित्यत्रापि च समन्तात्पदेन जिह्वामूलं लक्ष्यते "गंगायां घोष इति वत" । अन्यथा गलरोधि, कण्ठविरोधि शब्दयो रर्थान्वयासम्भवात् । चरके—जिह्वामूलेऽवतिष्ठन्ते । एवं वाग्भटे "जिह्वा प्रबन्धजा कण्ठे दारुणा" जिह्वा प्रबन्धजा–जिह्वामूलोत्था ( चन्द्रिका टीका ) इति स्पष्टोक्तेः । एवं रोहिण्या कण्ठ गतरोगेषु परिगणनात, रोहिणी दोषस्य च काकलक, मृदुतालु, श्वासपथ,

नासामार्गादौ, एव स्थितत्वात्, तन्त्रान्तरेऽपि तथैव व्याख्यानात्, प्रत्यक्षदर्शनात्, "कण्ठं यदा निषेवन्ते" तालु शुष्यति कण्ठश्च "कण्ठेस्यान्नं प्रसज्ज्येत" "श्वासः कण्ठश्च बाध्यते" इतिमाधव-टीकायां भोजवचनैश्च। तथा "जिह्वां समन्तादिति—जिह्वांव्याप्य सम्भवन्ति इत्यर्थः" इति डल्वनः, अत्र द्वितीयान्तु पाठस्तु अस्मदनु-कूल एव। व्यापनं च जिह्वामूलत एव। यत्तु माधव निदान टीकायां "जिह्वासमन्तादिति जिह्वायाः सर्वत इत्यर्थः"। अत्र षष्ठ्यर्थस्तु न पूर्वोक्तवाक्यैरन्वेति।

डाक्टर म्हस्कर महोदयस्तु—

कम्पो हृषितरोमत्वं स्वेदश्चक्षुर्निमीलनम्।
बहिरायमनं जिह्वादंशोऽतः कण्ठकूजनम्॥
धावनंविट्सगन्धत्वं क्रोशनं श्वानवच्छुनि।

वाग्भट उ० तं० अ० ३ श्लो० १५॥

इति श्वग्रहं डिप्थीरिया इति मन्यते।

इति रोहिणी।

# आन्त्रिके प्रथमषोडशपृष्ठयोः शुद्धाशुद्धि पत्रम्

| पृष्ठे | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| २ | १९ | धूपवत् | धूमवत् |
| ,, | २१ | Psevbo | Pseudo |
| ५ | २ | भाणं | भागं |
| ,, | ६ | प्लीहानौ | प्लीहानौ १ |
| ,, | १७ | पूर्वतो | १ पूर्वतो |
| ८ | ६ | ध्याध्ममत्युदरम | ध्याधमत्युदरम् |
| ६ | ११ | मत्रस्य | मूत्रस्य |
| ११ | १४ | प्र | प्रदेयं |
| १२ | १० | आन्त्रिकेभ्यो | आन्त्रिके |
| १३ | ९ | मताः | १ मताः |
| १४ | २ | तदनु | न तदनु |
| १५ | ८ | प्रोञ्छय | प्रोञ्छ्य |
| १६ | ८ | सेवने | सेविते |

## चिकित्सा।

सांसर्गिकत्वा दस्या रोगी पृथगेकान्ते जनाऽसंसर्गे स्थाने पूर्णविश्रामेण संरक्षणीय । प्रारम्भे कोष्ठशुद्धिरपि विधेया। पथ्यं लघु पुष्टिक्षदुग्धादि, सति च गलरोधे स्वरनलिकया (Stomach tube) गुदमार्गेण वा तद्देयम् । उष्णजलार्द्रीकृतनिपीडितोर्णवस्त्रेण बहि गलप्रदेशेऽसकृत्स्वेदः ।

## त्रिभागविभक्ता रोहणीचिकित्सा ।

१ स्थानिका। २ आभ्यन्तरा। ३ त्वाचप्रयोगेण च।

१ स्थानिका—

वमनं धूमपानं च गण्डूषो नस्यकर्म च।
सुखोष्णान् तैलकवलान् धारयेच्चाप्यभीक्ष्णशः॥

१ रोगनिर्णये सन्देहे ऽपि वा ताम्बूलीदलरसेन मसृणीकृतं गन्धकचूर्णं कण्ठे स्तरस्य सर्वतः शलाकाग्रलग्नतूलेन, उष्ट्रबालकृतकूर्चिकया वा त्रि श्चतु लेपयेत्।

२ ईषदुष्णजलमिश्रितेन ताम्बूलीदल१, चतुष्टयरसेन गण्डूषकरणम्

३ एरण्डकर्कटी २, (पपीता Creca Papaya) दुग्धं जलेन लेपितं पीतस्तरं रोहिण्या नाशयति।

---

१ ताम्बूलीदलरसः कार्बोलिकाम्लतः पञ्चगुणजन्तुघ्न इति ६२६ पृष्ठे, २-३३२ पृष्ठे। ३-५६० पृष्ठ एते त्रयो ऽपि प्रयोगाः, डा० गणेश देसाई M.B.B.S. कृत मराठीपुस्तक 'औषधीसंग्रह' नामका त्संगृहीताः।

४ वन्ययवानी ३, Thymuse rphyllum स्वरसमधुसीधु रैन्धवानां समभागमिलितानां सेवनं श्वासे-कासे-उत्कटवातकासे हितम्। रोहिण्यां तु एतै रेव प्रतिसारणं कार्यम्।

५ सौभाग्यचूर्णताम्बूलीदलरसेन प्रतिसारणमपि स्वरविलयनं करोति।

६ स्फटिकाजलेन गण्डूषाः। श्वेतादितैलस्य (सु० चि० अ० २२ श्लो०६२) कवलधारणं नस्यं च स्वरह्रासाय।

२ आभ्यन्तरा—

कटुकातिविषादारुपाठामुस्तकलिङ्गकाः।
गोमूत्रक्वथिताः पेयाः कण्ठरोगविनाशनाः॥
मृद्वीकाकटुकाव्योषा दार्वीत्वक् त्रिफला घनम्।
पाठा रसाञ्जनं दूर्वा तेजोह्वेति सुचूर्णितम्।
क्षौद्रयुक्तं विधातव्यं गलरोगे महौषधम्॥ चरकः चि०अ० २६

स्वाचप्रयोगेण—सम्प्रति हि रोहिणीप्रतिषेधकद्रव एव विशेषेण चिकित्सायां प्रयुज्यते तस्य रोगारम्भ एकेनैव स्वाचप्रयोगेण ज्वरश्वासादयो घण्टात्रयेणैव मन्दायन्ते। यावच्छीघ्र मेतस्य प्रयोग स्तावती मृत्युसंख्या ह्रसति। एतदाविर्भावा त्प्राक् प्रतिशतं मृत्युसंख्या ८०–९० आसीत्। सम्प्रति तु २–३। विधान मन्यत्रान्यतो ज्ञेयम्।

इति रोहिणीचिकित्सा

## परिशिष्टम्।

३०पृष्ठे–१८ पङ्क्तौ, बहिष्करोत्यनन्तरम्। प्रथमं कतिपयदिनेषु

तापः १०५ तो ऽधिकश्चेत्सम्भवतो नान्त्रिकज्वर इति पूरणीयम् ।
पृ० १७ पं० २२ शोणितार्गलः ।

लोहाभ्रलाक्षा एकभागाः, स्फटिकार्धभागा, गैरिक-रसाञ्जन-खून-खराबा (दम्बुल अखवायन) रक्तचन्दनरससिन्दूराणि द्विभागिकानि, एतेषां बब्बूरपत्रस्वरसेन द्विरक्तिकावटी (अयं शोणितार्गलो रसः) दूर्वावासक-दाडिमपत्राऽमलकीरसत्रिफलातण्डुलजलाना मन्यतमे-नाऽनुपानेन यथारोगं यथावस्थं रक्तातिसार-रक्तप्रदर-रक्तार्शः प्रवाहिका रक्तपित्तेषु मुखनासादिभ्यो रक्तनिर्गमे च रक्तपित्त-कुलकुठार वद्बोल* पर्पटीवच्चाऽऽश्चर्यफलदो देयः ।

शतपुष्पा मिश्रेयाबीज हरिद्रा-दारुहरिद्रा-देवदारु सितोपला-मांसी-जीवन्तीमूलानां समभागानां घृततैलभर्जितेन चूर्णेन प्रत्यहं द्वि रुपनाहस्वेदो दारुणं बद्धमूलं पार्श्वशूलं नाशयति । एकोपनाह-श्चाऽऽपड्घण्टं धारणीयो वेष्टनीय श्च पलाशपत्र तूलकादिभिरु-पर्युपरि । (५६ पृष्ठे ज्ञेयम्)

इति प्रतिसँस्कृतनिदानचिकित्साया द्वितीयो भागः ।

## प्रतिसंस्कृतनिदाने समागतानां प्रयोगाणां ग्रन्थसङ्केतः

शार्ङ्गधरः—शा० ध० । रसेन्द्रसारसंग्रहः—र० सा० सं० । भैषज्यरत्नावली—भै० र० । चरकः—च० । योगरत्नाकरः—यो० र० । रसतरङ्गिणी—र० त० । भावप्रकाशः— भा० प्र० । एवं सर्वत्र, प्रथम पृष्ठाङ्का स्ततः पङ्क्त्यङ्का ज्ञेयाः । यथा लक्षण-

---

* यो० र० क० यक्ष्मा ।

भास्करः—११, पृष्ठे ११, पङ्क्तौ शा० ध० २, ख० अ० ६, श्लो० ३८ । रसपुष्पम् १३ । १४, र० त०, ६ त० श्लो० २१ । चतुर्मुखः १५ । २, र० सा० सं० वात० श्लो० ३८ । कर्पूरादिवटी, १६ । १८, र० सा० सं० अति; श्लो० १ । सिद्धप्राणेश्वरः—१६ । १८, र० सा० सं० ज्वरातिसार, श्लो० ११ । मृतसञ्जीविनी—१७ । ११, भै० र०, वाजीकरण-४१ । द्राक्षारिष्टः—१७ । ११, शा० ध० २, ख० अ० १०, श्लोक ६९ । मृगमदासवः—१७ । १२, भै० र०, ज्वर० २८१ । मकरध्वजः—१७ । १२, भै० र०, ध्वजभङ्ग—८ । वसन्तकुसुमाकरः—वसन्ततिलकः—१७ । १२, र० सा० सं० वाजीकरण श्लो० ८० । ७८ । लक्ष्मीविलासः—१७ । १२, र० सा० सं० वाजीकरण—२० । अहिफेनासवः—१८ । २, यो० त० २४ त० श्लो० २८७ । महातिक्तघृतम्—२० । १, च० चि० अ० ७, श्लो० १४१ । श्वासकासचिन्तामणिः—२० । १८, श्वासचिन्तामणि ज्ञेयः-भै० र०, हिक्काश्वास—१७ । सैन्धवादि, बृहत सैन्धवादितैलम्—२१ । १, भै० र०, आमवात—१८ । १९ । अष्टाङ्गावलेहः—२१ । ४, भा० प्र० सन्निपात—६३६ । वासावलेहः—२१ । ४, भै० र०, कास०—२३ । हिंग्वष्टकम्—२३ । २, भै० र० अग्निमान्द्य, ४ । रसोनाष्टकम् २३ । ३, भा० प्र० आमवात—१०५ । स्वल्पाग्निमुखम्—२३ । ३, भै० र० अग्नि ५ । बृ० शङ्खवटी—२४ । ९, भा० प्र०, जठराग्नि—६६ । च्यवनप्राशः-२४ । २२, च० चि०, अ० १ श्लो० ५९ । किणः क्विनाईन् । अम्लपित्तम्—४१ । ६, अम्लूकपित्तम् ।

कनकासवः—४२ । १०, भै० र०, श्वास -१९ । दशमूलारिष्टः—४२ । १२, भै० र०, वाजीकरण—४२ । उन्मत्तरसः—४४ । १५, शा० ध० २ ख०, अ० १२, श्लो० ३४ ।

शृंग्यादिचूर्णम्—४५ । ४, भै० र० हिक्काश्वास ५ । कट्फलादि-चूर्णम् ४५ । ४, शा० ध० २ ख० ६ अ० श्लो० ४२ । तालीसादि-चूर्णम् ४५ । ८ शा० ध०, २, ख० अ० ६, श्लो० १३० । चन्द्रामृत-रसः—४६ । १६, भै० र०, कास २७ । सितोपलादि ५० । ११, शा० ध०, २, ख० ६ अ० श्लो० ३४ । कफकेतुः—५१ । १५, भै० र० ज्वर० २७३ । श्लेष्मशैलेन्द्रः—५१ । १६, भै० र० ज्वर०, ३३२ । कफचिन्तामणिः—५१ । १६ र० सा० सं० कफरो० ३३ । लवङ्गादिवटी—५१ । १९, यो० र० कास० ३ । यवक्षारादि-बटी-५१ । १९. शा० ध० २, ख० ७, अ० श्लो० १३, १४ । लवङ्ग-चतुस्समः-५२ । ४, भै० र०, बालरोग० ५९ । श्वासकुठारो रसः—५३ । ९, र० सा० सं० हिक्काश्वास, श्लो० १७ ।

रसचूर्णम् ५७ । ७, रसपुष्पम् । तारकेश्वरः-५७ । २२. भै० र० मूत्रकृच्छ्र । प्रवालपञ्चामृतम् ५९ । ५, यो० र० गुल्म० । अमृतप्राश-घृतम् ५९ । ५, च० चि० क्षतक्षीण । समीरपन्नगः-५९ । ७, यो० र० वातव्या० । चातुर्भद्रम् ६७ । ११, भै० र०, बालरोग ९ । जातीफ-लादि-६७ । १८, शा०ध० ख० २ अ० ६ श्लो० ७० । विषगर्भतैलम् ६७ । २१, यो० त०२४ त० टि० । हिङ्गुलेश्वरः-७० । ८, र०सा०सं० ज्वर । वृ० कफकेतुः-७० । ८, भै० र०, ज्वरा० २७४ । योगराज-गुग्गुलुः-७० । १३, शा० ध० २ ख० ७ अ० श्लो० ५६, चन्द्रप्रभा-

गुग्गुलुः-शा० ध० ख० २, अ० ७, श्लो० ४०। अग्नितुण्डीवटी-७१। १, शा० ध० २, ख० १२, अ० श्लो० २२१। रसोनपिण्डः ७१। २, भै० र०, आमवा० १२। योगेन्द्ररसः-७७। ३ भै० र० वातव्या। वरुणादिलौहम् ७७। ३, र० सा०सं० मू० कृ। खदिरादिगुटी-७२। १ भै० र०, मुखरोग ५८। वरुणादितैलम् ७७। ४, ऊह्यम्। नारायणतैलम्। ७४। ४ शा० ध० २ ख० ७ अ० श्लो० ९९

एतत्पुस्तकोक्ताः प्रयोगा अन्ये च शास्त्रसम्मताः पन्तरस-शाला सीतारामबाजार देहलीतोऽपि लभ्याः।

श्रीघनानन्दपन्तेन चिद्घनानन्दचेतसा।
यद्घनानन्दतो लब्धं घनानन्दे तदर्पितम्॥

## सूचनम्।

आयुर्वेदे सूत्ररूपेण व्याख्यातेषु ध्वनितेषु ध्वनितकल्पेषु वा संप्रति लोके प्रचलितेषु येषु रोगेष्वस्माकं विशेषानुभवस्तेष्वेव एवं विधा एव निबन्धाः प्रतिरोगमपतन्त्रकादिषु। ( हिस्टीरिया ) लिखिता वर्त्तन्ते। आयुर्वेदानुरागिभिरेतेऽनुमोदिताश्च तेऽपि क्रमेण मुद्रिता भवेयुः।

———

प्रतिसँस्कृतनिदानचिकित्सा के प्रथम भाग पर

# अयाचित प्रशंसा वाक्य

यह गवेषणात्मक लेख विशेष प्रकाश डालने वाला है अतः विद्वद्वृन्द अवश्य मंगा देखें। धन्वन्तरि।

श्री पं० घनानन्द जी पन्त एक अच्छे प्रसिद्ध विद्वान् वैद्य हैं। आपने बहुत से उन रोगों पर छोटे छोटे निबन्ध लिखे हैं जिन्हें डाक्टरों ने अपनी भाषा के नाम से विशेष प्रसिद्ध कर रखा है, और उन रोगों का वर्णन अयुर्वैदिक पुस्तकों में और रूप से होने के कारण वैद्य और अन्य सज्जन नहीं जान पाते। इससे उनकी आयुर्वेद पर श्रद्धा घटती जाती है।

आपने फिरङ्ग, उपदंश, उष्णवात और पागलपन की दवा चाँदड़ पर लिखे वर्णन पुस्तकाकार में छपा दिये हैं। पुस्तक अच्छी है। लेखक महोदय से प्रार्थना है कि इन सभी वर्णनों की (वैद्यों के लिये ज्ञातव्य और अयुर्वेद के ढङ्ग की) एक शैली स्थिर करके सब का संग्रह एकत्र प्रकाशित कर दें। यह उनकी एक निजी चीज होगी। वैद्य सम्मेलन पत्रिका।

उक्त पुस्तक में मान्य लेखक ने सर्पगन्धा (पागल की दवा) फिरंग रोग और उष्णवात (सूजाक) के निदान और चिकित्सा पर अच्छा प्रकाश डाला है। निवन्ध वैद्यों के लिए उपयोगी है। आयुर्वेद सन्देश

इस निबन्ध में **सर्पगन्धा** (चांदेर) का संक्षिप्त परन्तु सारगर्भित विवेचन तथा फिरंग उपदंश और उष्णवात का वैज्ञानिक

पद्धतिसे अत्युत्तम वर्णन किया गया है। फिरङ्ग और उपदंश के पारस्परिक भेदक लक्षण. निदान, लक्षण. चिकित्सा आदि का वर्णन प्रत्येक वैद्य के लिये अत्युपयोगी है। सर्पगन्धा नामक बनस्पति बिहार और बङ्गालमें उन्माद की अमोघ औषध समझी जाती है, इसमें नींद लाने का विशेष गुण है। इससे प्रत्येक वैद्य को अवश्य परिचय प्राप्त करना चाहिये। आरोग्यदर्पण

वैद्यराज मणिराम शर्मा (रसेन्द्र चिन्तामणि टीकाकार:) प्रिन्सीपल एच० आर० सँस्कृत कौलेज आयुर्वेद विभाग--रामगढ़ (जयपुर)।

अत्रोहापोहज्ञानां प्राच्यप्रतीच्यरोगज्ञानसमन्वयकृतां भवतां प्रयत्न स्तुत्यो नितराम्। यत स्वल्पे ऽपि व्याख्याने प्रकृत विषयस्य सर्वांशा:सन्निवेशित: सुगमवेद्यश्च। ईदृशैरेव निबन्धै रुन्नति र्भविता भारतायुर्वेदस्येति।

———

# विज्ञापन

## प्रतिसंस्कृत निदानम्

महामारी---गर्भिणी परिचर्यादि निबन्धकार--और तिब्बी कालेज, बी० एल्० आ० वे० विद्यालय दिल्ली---डी०ए० वी० आ० वै० कालेज, प्रेमगिरि आ० वे० स० वि० लाहौर तथा नि० भा० आ० वे० विद्यापीठ के परीक्षक---साहित्याचार्य--पं० वैद्य-घनानन्द पन्त-विद्यार्णव-रचित--हितार्थ सहज संस्कृत में नातिसंक्षेपविस्तर सद्वैद्यों के कहने से पाठ्य पुस्तकार्थ लिखे, इसमें एक एक रोग पर उस से सम्बद्ध कोई विषय छोड़ा नहीं गया है। यह निबन्ध अनेक भागों में विरुक्त होगा। प्रायः उन्हीं रोगों पर लिखा गया है, जो कि आयुर्वेद में सूत्ररूप से वर्णित हैं। जैसे--शालूकादि। या जिन रोगों को ऋषियों ने अपने व्यवहार से प्रकरणान्तरों में ध्वनित किया है, जैसे--तूनी, सूरिसी आदि--

इन भागों के आदि में "सर्पगन्धा" "सोम" का वर्णन दिव्यौषधि होने से दे दिया है। सर्पगन्धा उन्माद, अनिद्रा, उच्चैःरक्तवेग High Blood Pressure में, सोम श्वास पर चीन देश में पांच हजार वर्ष से प्रचलित है। इनकी वैज्ञानिक रीति से भी परीक्षा हो चुकी है। उक्त दोनों दवाओं का वैद्यों में शीघ्र प्रचार के लिये हमारे पास संग्रह भी रहता है।

चिकित्सा में वे ही प्रयोग दिये हैं जो अपने अनुभूत हैं। इस पुस्तक को छपते ही देहली बी० एल० विद्यालय आदि ने अपनी पाठ्य पुस्तकों में ले लिया है, कुछ प्रशंसावाक्य और द्वितीय भाग की सूची इसके साथ है। कस्तूरी की सुगन्धि शपथ लेने से नहीं जानी जाती।

नि०--दीपचन्द्र शर्मा बी० ए०

# विषय-सूची

प्रतिसँस्कृतनिदानचिकित्सा के प्रथम भाग पर

# अयाचित प्रशंसा वाक्य

यह गवेषणात्मक लेख विशेष प्रकाश डालने वाला है अतः विद्वद्वृन्द अवश्य मंगा देखें। धन्वन्तरि।

श्री पं० घनानन्द जी पन्त एक अच्छे प्रसिद्ध विद्वान् वैद्य हैं। आपने बहुत से उन रोगों पर छोटे छोटे निबन्ध लिखे हैं जिन्हें डाक्टरों ने अपनी भाषा के नाम से विशेष प्रसिद्ध कर रखा है, और उन रोगों का वर्णन अयुर्वेदिक पुस्तकों में और रूप से होने के कारण वैद्य और अन्य सज्जन नहीं जान पाते। इससे उनकी आयुर्वेद पर श्रद्धा घटती जाती है।

आपने फिरङ्ग, उपदंश, उष्णवात और पागलपन की दवा चाँदड़ पर लिखे वर्णन पुस्तकाकार में छपा दिये हैं। पुस्तक अच्छी है। लेखक महोदय से प्रार्थना है कि इन सभी वर्णनों की (वैद्यों के लिये ज्ञातव्य और अयुर्वेद के ढङ्ग की) एक शैली स्थिर करके सब का संग्रह एकत्र प्रकाशित कर दें। यह उनकी एक निजी चीज होगी। वैद्य सम्मेलन पत्रिका।

उक्त पुस्तक में मान्य लेखक ने सर्पगन्धा (पागल की दवा) फिरंग रोग और उष्णवात (सूज़ाक) के निदान और चिकित्सा पर अच्छा प्रकाश डाला है। निबन्ध वैद्यों के लिए उपयोगी है।

आयुर्वेद सन्देश

इस निबन्ध में **सर्पगन्धा** (चांदेर) का संक्षिप्त परन्तु सारगर्भित विवेचन तथा फिरंग उपदंश और उष्णवात का वैज्ञानिक

पद्धतिसे अत्युत्तम वर्णन किया गया है। फिरङ्ग और उपदंश के पारस्परिक भेदक लक्षण, निदान, लक्षण, चिकित्सा आदि का वर्णन प्रत्येक वैद्य के लिये अत्युपयोगी है। सर्पगन्धा नामक बनस्पति बिहार और बङ्गालमें उन्माद की अमोघ औषध समझी जाती है, इसमें नींद लाने का विशेष गुण है। इससे प्रत्येक वैद्य को अवश्य परिचय प्राप्त करना चाहिये। आरोग्यदर्पण

वैद्यराज मणिराम शर्मा (रसेन्द्र चिन्तामणि टीकाकार:) प्रिन्सीपल एच० आर० सँस्कृत कौलेज आयुर्वेद विभाग--रामगढ़ (जयपुर)।

अत्रोहापोहज्ञानां प्राच्यप्रतीच्यरोगज्ञानसमन्वयकृतां भवतां प्रयत्न स्तुत्यो नितराम्। यत स्वल्पे ऽपि व्याख्याने प्रकृत विषयस्य सर्वांश:सन्निवेशित: सुगमवेद्यश्च। ईदृशैरेव निबन्धै रुन्नति र्भविता भारतायुर्वेदस्येति।

---



अमर सागर प्रिंटिंग वर्क्स, बाज़ार सीताराम, देहली।

पद्धतिसे अ
पारस्परिक
प्रत्येक वै
विहार
इसमें
परि



उत्तरे हिमवत्पार्श्वे सरयूतटसन्निधौ ।
स्थानमस्ति 'यजूटा'ख्य मायुर्वेदविदांमतम् ॥
तत्र जातेन ।

द्वाविंशतिकुलक्रमागतायुर्वेदव्यवहारस्य कूर्माचलीय-सुप्रसिद्धवैद्यराजहरिकृष्णपन्तस्यात्मजेन महामारी, गर्भिणी—परिचयादि निबन्धकृता, घनानन्दपन्तेन ।

आर्षाभिप्रायमालम्ब्य वैज्ञानिकवचोमृतैः ।।
विशिष्य रचितः सोऽयं विषयोद्धारकाम्यया ॥

पुस्तक मिलने का पता—
वैद्य पं० राधावल्लभ पन्त, बाजार सीताराम,
देहली ।
तथा बम्बई पुस्तक एजेन्सी, दरीबा, देहली ।